# चतुर्थोल्लासे ध्वनिविमर्शः

द्वितीयतृतीयोल्लासयोः शब्दार्थचर्चां विधाय काव्यलक्षणानुसारेण दोषगुणालङ्कारदिधर्माणां चर्च्चा अपेक्षिता अस्ति। किन्तु धर्मिणः विस्तृतालोचनं विना धर्माणां हेयता (न्यूनता) उपदेयता च न ज्ञायेते। अतः चतुर्थे उल्लासे ध्वनिकाव्यात्मकधर्मिणः चर्च्चां करोति ग्रन्थकारः। ध्वनिः तत्र स्यात् यत्र वाच्यार्थात् व्यङ्ग्यार्थस्य प्राधान्यं भवेत्। अयं ध्वनिः वहुभिः भेदैः काव्यमार्गे व्यवह्रियते यथा–




मुख्यतः अविवक्षितवाच्यविवक्षितान्यपरवाच्यभेदेन ध्वनेः द्वैविध्यं स्वीकृतमस्ति। अयमपि 'लक्षणामूलध्वनिः', 'अभिधामूलध्वनिः' इति नाम्नि व्यपदिश्यते।

## अविवक्षितवाच्यध्वनिः

**लक्षणामूलध्वनिः**– यदा गूढव्यङ्ग्यप्रधानकाव्ये वाच्यः स्वजातिरूपमर्थं परित्यज्य गुणरूपेऽर्थे संक्रमति, क्वचित् च पूर्णतया अनुपयुज्यमानः सन्



Scanned with CamScanner

नवीनार्थे संक्रमति तदा लक्षणामूलध्वनिर्भवति। अर्थात् वाच्यस्य अर्थान्तरसंक्रमणे उपादानलक्षणा, अत्यन्ततिरस्कृतेत्व लक्षणलक्षणा च भवतः। अनेनैव क्रमेण लक्षणामूलध्वनिः द्विविधो भवति। अत्र वाच्यार्थः अर्थान्तरसंक्रमणात्यन्ततिरस्कृतेति प्रकारद्वयेन अविवक्षितः। अतः अविवक्षितं वाच्यं यत्र इति व्युत्पत्त्या लक्षणामूलगूढव्यङ्ग्यस्थले एव अस्य आशयः। किंवा अविवक्षितं = अनुपयुक्तं अन्वयायोग्यं वा, वाच्यः = वाच्यार्थो यत्र, तत्र अविवक्षितवाच्यध्वनिः। अगूढव्यङ्ग्यस्थले गुणीभूतव्यङ्ग्यं स्यात्, न तु ध्वनिः।

**अर्थान्तरसंक्रमितवाच्यध्वनेः उदाहरणं यथा-**

**त्वामस्मि वच्मि विदुषां समवायोऽत्र तिष्ठति।**
**आत्मीयां मतिमास्थाय स्थितिमत्र विधेहि तत्॥**

**प्रसङ्गः**- विद्वद्गोष्ठिमध्ये कमपि मुर्खं प्रति कश्चन हिताकांक्षी वक्ति।

**वाच्यार्थः**- अहं त्वां वदामि। अत्र विद्वज्जनानां समावेशः प्रचलति। अतः स्वबुद्ध्यनुसारेण युक्तियुक्तं वचनं ब्रूहि। अशास्त्रीयवचनं मा ब्रूहि।

**व्यङ्ग्यार्थः**- अहं तव हिताकारी अस्मि। अतः त्वामुपदिशामि, विद्वद्गोष्ठ्यामत्र अनावश्यकं वचनं मा वद। अन्यथा सर्वेषां सम्मुखे उपहसितो भविष्यति।

**समन्वयः**- अत्र वच्मि इति पदं सामान्यकथनात्मकं वाच्यार्थं विहाय उपदेशात्मकवचनं प्रति संक्रमति। अतः अर्थान्तरसंक्रमितवाच्यध्वनिः। उपादानलक्षणायाः विषयोऽयं व्यङ्ग्यार्थप्राधान्याधारेण ध्वनिः।

**अत्यन्ततिरस्कृतवाच्यध्वनेः उदाहरणम्-**

**उपकृतं बहु तत्र किमुच्यते सुजनता प्रथिता भवता परम्।**
**विदधदीदृशमेव सदा सखे! सुखितमास्व ततः शरदां शतम्॥**

**प्रसङ्गः**- बहुभिरपकारैः व्यथितहृदयस्य कस्यापि अपकारिणं प्रति कथनम्।

**वाच्यार्थः**- हे सखे! त्वया यः उपकारः कृतः बहुत्वात् वक्तुं न शक्यते। यत्





सौजन्यं प्रकटितं तत्तु श्रेष्ठतमम्। एतादृशम् उपकारं सौजन्यप्रदर्शनं च कृत्वा सर्वदा सुखी भव। शतंवर्षाणि च सुखेन तिष्ठ।

**व्यङ्ग्यार्थः**- हे शत्रो! त्वया महान् अपकारः कृतः। सर्वदा दुर्जनता च प्रकटिता। अतः समाजे त्वादृशस्य खलस्य आवश्यकता नास्ति। शीघ्रं ते मरणं भवतु।

**समन्वयः**- अत्र अपकारातिशयः व्यङ्ग्यः। वाच्यार्थः यदा वक्तुरभिप्रायं प्रकाशयितुमसमर्थः, तदा उपकृत-सुजनता-सुखित्वादिपदानि वाच्यं विहाय विपरीतलक्षणाधारेण अपकार-दुर्जनता-दुःखितादिलक्ष्यार्थं प्रकाशयन्ति। तेन वक्तुः अभीष्टार्थस्य परिप्रकाशो भवति। लक्षणलक्षणास्थले पदानामेतादृशप्रयोगः सम्भवति। अयं लक्ष्यार्थश्च अपकारातिशयादिव्यङ्ग्येन चमत्कारातिशयं पुष्णाति। अतः अत्यन्ततिरस्कृतवाच्यध्वनिः।

उपादानलक्षणामूलः अर्थान्तरसंक्रमितवाच्यध्वनिः, लक्षणलक्षणामूलश्च अत्यन्ततिरस्कृतवाच्यध्वनिः। लक्षणाभेदप्रसङ्गे उक्तं चानयोः लक्षणम्-

स्वसिद्धये पराक्षेपः - उपादानलक्षणा।
परार्थे स्वसमर्पणम् - लक्षणलक्षणा।

## विवक्षितान्यपरवाच्य ध्वनिः

यस्मिन् ध्वनौ वाच्यार्थः सामान्यार्थं प्रकाश्य वक्तुरभिप्रायं स्पष्टीकर्त्तुम् अन्यपरं = व्यङ्ग्यनिष्ठं भवति। अर्थात् वाच्यः विवक्षितः = सामान्यार्थप्रकाशनेन वाक्यार्थवोधने क्षमः, अन्यपरः = प्रकृतार्थप्रकाशनाय व्यङ्ग्यनिष्ठो भवति। तत्र वाच्यार्थात् व्यङ्ग्यस्य प्राधान्ये ध्वनिः। अभिधामूलगूढव्यङ्ग्यप्राधान्ये अस्य आशयः। अन्यपरमिति विशेषणेन गुणीभूतव्यङ्ग्य-चित्रकाव्ययोरतिव्याप्तिः वारिता। अस्यापि नामान्तरं अभिधामूलध्वनिः। अयं विवक्षितान्यपरवाच्यध्वनिः मूलतः द्विविधः। ताभ्याम् अनेके प्रभेदाः सम्भवेयुः यथा-



Scanned with CamScanner




**रसादीनामलङ्कारता**- रसः सर्वदा व्यङ्ग्यरूपः। विभाव-अनुभाव-व्यभिचारिभावाः रसस्य व्यञ्जकाः। श्लोकवाक्ये वाच्यमुखेन विभावानां कथनं भवति। तेभ्यः व्यञ्जितः स्थायी रसत्वं भजते। मुख्यतः रसः ध्वनिरेव। किन्तु केषुचित् स्थलेषु भावध्वनेः अङ्गत्वेन रसानामुपन्यासः कविभिः क्रियते। तत्र रसवत्-प्रेयः-उर्जस्वी-समाहितेत्यादयः अलङ्काराः भवन्ति। उक्तं च ध्वनिकारेण-

> प्रधान्येऽन्यत्र वाक्यार्थे यत्राङ्गं तु रसादयः।
> काव्ये तस्मिन्नलङ्कारो रसादिरिति मे मतिः।।

अपरस्याङ्गगुणीभूतव्यङ्ग्यस्य एते विषयाः। तथापि सामान्यतः तेषां स्वरूपमत्र विचार्यते यथा-

**रसवदलङ्कारः**- रसस्य अङ्गत्वेन वर्णना। यथा- **अयं स रसनोत्कर्षी**त्यादिश्लोके शृङ्गारः करूणस्य अङ्गतया वर्णितः।

**प्रेयोऽलङ्कारः**- भावस्य अङ्गत्वेन वर्णना। यथा **अत्युच्चाः परितः** इत्यादिश्लोके भूविषयकः कविनिष्ठः रतिभावः राजविषयककविनिष्ठरतिभावस्य अङ्गत्वेन वर्णितः।

**उर्जस्वी-अलङ्कारः**- रसाभासस्य भावाभासस्य वा अङ्गत्वेन वर्णना यथा- **वन्दीकृत्य नृपद्विषा**मित्यादि श्लोके राजाविषयककविनिष्ठरतिभावस्य





सैनिकनिष्ठशृङ्गारः प्रत्यर्थिनिष्ठो रतिरूपो भावः अनौचित्यप्रकृतत्वात् रसाभासः। तस्य च अङ्गत्वेन वर्णनात् उर्जस्वी-अलङ्कारः।

**समाहितोऽलङ्कारः**- भावशान्तेः अङ्गत्वेन वर्णना। यथा- **अविरलकरवाल** इत्यादि श्लोके वैरिणो मदाख्यो गर्वरूपो भावप्रशमः कविनिष्ठराजविषयकरति भावप्रशमस्य अङ्गत्वेन वर्णनात् अलङ्कारता।

वस्तुतः गुणीभूतव्यङ्ग्यस्य अयं विषयः। अतः पञ्चमोल्लासे तत्प्रसङ्गे विस्तृतविचारः करिष्यते।

## काव्यमार्गे रसास्वादः

रामचरितनाटके सीता यदा रामं प्रति अनुरक्ता भवति तदा सहृदयानां मनसि घनानन्दरसस्य बोधो भवति। तत्र क्रमो यथा-

१. राम— आलम्बनविभावः } लोकदृष्ट्या सीताकृते कारणम्
चन्द्रिकादिवर्णनम्— उद्दीपनविभावः }

२. कटाक्षपातभुजाक्षेपादिरभिनयः- अनुभावः → लोकदृष्ट्या कार्यम्

३. चिन्ता-जडता-अलसतादयः- व्यभिचारिभावः → लोकदृष्ट्या सहकारिणः

४. सहृदयहृदयस्थभावः- स्थायिभावः - लौकिकसंसारात् संस्कारवशात् प्राप्तः। अयमेव रत्याख्यस्थायिभावः पूर्वोक्त विभावानुभावव्यभिचारिभिः आवरणभङ्गतामाप्य शृङ्गाररूपेण आस्वाद्यते। अस्य चित्रं यथा-

| लोके | काव्यदृष्ट्या |
|---|---|
| कारणं | विभावः— [आलम्बनः<br>उद्दीपनः |
| कार्यं | अनुभावः |
| सहकारी | व्यभिचारिभावः<br>(संचारिंभावोऽपि अस्य नामान्तरम) |






Scanned with CamScanner

## मम्मटस्य रसस्वरूपम्

अलक्षक्रमव्यङ्ग्यध्वनिः रसादिरूप एव। स च विभावादिभिर्ध्वनितो भवति। विभावादिवोधानन्तरं रसवोधे यदि वा क्रमोऽस्ति तथापि अतिसौक्ष्म्यात् क्रमो न संलक्षते। अतः अलक्षक्रमव्यङ्ग्य इति संज्ञा। यथा शतं उत्पलपत्राणि क्रमशः सज्जीकृत्य सूचीभेदः यदा क्रियते तदा प्रथम-द्वितीयादिदलानां भेदक्रमः कथनमसम्भवो भवति। तथाहि विभावादिभ्यः रसप्रतीतिकाले विभाव-अनुभाव-व्यभिचारिणाम् क्रमः न संलक्ष्यते। विभावादिभ्यः रसप्रतीतिः किन्तु विभावादयो रसाः न भवन्ति।

आचार्यः मम्मटः रसस्य स्वरूपं निरूपयति यथा-

कारणान्यथ कार्याणि सहकारीणि यानि च
रत्यादेः स्थायिनो लोके तानि चेन्नाट्यकाव्ययोः।
विभावा अनुभावस्तत् कथ्यन्ते व्यभिचारिणः।
व्यक्तः स तैर्विभावाद्यैः स्थायी भावो रसः स्मृतः॥

अर्थात् लौकिकं कारणं काव्ये विभावपदेन, लौकिकं कार्यं काव्ये अनुभावपदेन, सहकारिकारणं काव्ये व्यभिचारिपदेन च व्यपदिश्यन्ते। तैः विभाव-अनुभाव-व्यभिचारिभिः व्यञ्जितः स्थायिभावो रसरूपेण सहृदयहृदये आनन्दं जनयति। सहृदयहृदये स्थितः वासनारूपः रत्यादिः विभावादिभिः व्यक्तो भवति। उदाहरणं यथा- रामायणविषयकनाटके सहृदयः रामसीतादिरूपेण अभिनयं कुर्वतः नरान् पश्यति। तल्लीनतया यदा पश्यति तदा रामसीतयोः शृङ्गारं विलोक्य स्वहृदयस्थवासनारूपां रतिमनुभवति। तत्र रसास्वादे रामः-आलम्बनविभावः, चन्द्रिकादिवर्णनम्-उद्दीपनविभावः तदनुचिन्तनात्मकाभिनयः अनुभावः, तच्चिन्ता व्यभिचारिभावः तस्मात् व्यक्तः स्थायिभावः समूहालम्बनात्मकं शृङ्गारं द्योतयति।





## भरतमुनिकृतं रससूत्रम्

आचार्यो मम्मटः स्वमतस्य द्रढीकरणाय नाट्यशास्त्रे षष्ठाध्याये प्रदत्तं रससूत्रमुपस्थाप्य प्रमुखचतूर्णां टीकाकाराणां मतानि उपन्यसति। भरतस्य रससूत्रं यथा- **विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः।**

अर्थात् विभाव + अनुभाव + व्यभिचारिभावानां संयोगात् रसस्य निष्पत्तिः। विभावश्च अनुभावश्च व्यभिचारिभावश्चेति, तेषां। अत्र द्वन्दसमासेन विभावादीनां समसनात् रसवोधे सर्वेषां भावानां प्राधान्यम् अङ्गीकृतमस्ति। विभावादीनां स्वरूपं नाट्यशास्त्रे यथा-

**विभावः**- विभावः रसनिष्पत्तौ प्रमुखं कारणं भवति। लक्षणं यथा- विभाव्यतेऽनेन वागङ्गसत्त्वाभिनया इति विभावः।

यथा विभावितं विज्ञातार्थमित्यर्थान्तरम्। नाट्यशास्त्रे-६

अतएव आदौ येन वाचिक-आङ्गिक-सात्त्विकाभिनयानां विभावनं भवति। रत्याद्युद्बोधको भावः विभावः। आलम्बनोद्दीपनभेदेन विभावः द्विधा।

साहित्यदर्पणे आलम्बनस्य लक्षणम्-

आलम्बनो नायिकादिस्तमालम्ब्य रसोद्गमः। साहित्यदर्पणे ३/२९

तत्र उद्दीपनस्य लक्षणम्-

उद्दीपनविभावास्ते रसमुद्दीपयन्ति ये।
आलम्बनस्य चेष्टाद्या देशकालादयस्तथा। साहित्यदर्पणे ३/३१

अतएव यं नायकं यां नायिकां वा आधारीकृत्य रसोपस्थापनाय कविः इच्छति स सा वा आलम्बनविभावः। तस्यालम्बनस्य विविधचेष्टार्थं पारिपार्श्विकानुकूलपरिवेशः उद्दीपनविभावस्य विषयः।

**अनुभावः**- अनुभावस्तु लौकिकदशायां कार्यमुच्यते। कारणात् यथा- कार्यस्य उत्पत्तिः, तथा विभावात् अनुभावस्य उत्पत्तिः। उक्तं च दशरूपककारेण धनञ्जयेन- अनुभावविकारस्तु भावसंसूचनात्मकः। ४/३



Scanned with CamScanner

दर्पणकारेणापि उक्तम्-

उद्बुद्धैः कारणैः स्वैः स्वैर्वहिर्भावं प्रकाशयन्।
लोके यः कार्यरूपः सोऽनुभावः काव्यनाट्ययोः ॥

अनुभावोऽपि द्विविधः-

१. नायकनायिकादिपात्रगतशरीरचेष्टारूपाः कटाक्षपातभूजाक्षेप-स्मितादयः।

२. नायकनायिकादिपात्रगतमनोविकारजाताः स्वेदादयः। प्रथमस्तु आङ्गिकः अतः दृष्टियोग्यः।

द्वितीयस्तु मनोविकारजः अतः अदृश्यः। अस्याऽपि सात्त्विकभावस्य अष्टौ भेदाः सम्भवन्ति। यथा साहित्यदर्पणे-

स्तम्भः स्वेदोऽथ रोमाञ्चः स्वरभङ्गोऽथ वेपथुः।
वैवर्ण्यमश्रुप्रलय इत्यष्टौ सात्त्विकाः स्मृताः। ३/१३५

रसतरङ्गिणीग्रन्थे तु अधिकतया एकस्य सात्त्विक भावस्य कल्पनमस्ति यथा- जृम्भा च नवमो सात्त्विकभाव इति प्रतिभाति।। अतएव एतन्मते नवसात्त्विकभावाः। भरतमुनिस्तु अष्टौ सात्त्विकभावान् स्वीकरोति।

एते सात्त्विकभावाः अनुभावान्तर्गताः पुनश्च व्यभिचारिभावेषु अपि परिगणिताः। अतः रससूत्रे सात्त्विकभावस्य परिगणनं स्वतन्त्रतया भरतेन न कृतम्।

**व्यभिचारिभावाः**- व्यभिचारिभावास्तु अस्थिरचित्तवृत्तिस्वरूपाः। विभावानुभावापेक्षया एते भावाः विभिन्नरसानामनुकूलव्यवहारेण सञ्चरन्ति। भरतः '**विविधामभिमुख्येन रसेषु चरन्तीति व्यभिचारिणः**' इति वदति।

धनञ्जयो वदति यथा-

विशेषादभिमुख्येन चरन्तो व्यभिचारिणः।
स्थायिन्युन्मग्ननिर्मग्नाः कल्लोला इव वारिधौ। ४/८





अतः काव्यमार्गे अस्य नामान्तरं सञ्चारीति कृतमस्ति। एते भावाः न दीर्घस्थायिनः। एतेषां त्रयस्त्रिंशत् भेदान् भरतादारभ्य इदानीं यावत् सर्वे स्वीकुर्वन्ति। कदाचित् एते व्यञ्जिताः सन्तः आनन्ददायकाः भवन्ति।

**रससूत्रस्य चत्वारः मतवादाः**




**भट्टलोल्लटस्य मतसारः**- रामचरितात्मनाटकदर्शनकाले यदा सीतारामयोः प्रणयोऽभिनीयते तदा सहृदयः दर्शकः ललनादि-आलम्बनविभावं, उद्यानादि-उद्दीपनविभावं पश्यति। ताभ्यामालम्बनोद्दीपनविभावाभ्यां रत्यादिभावः उत्पद्यते। तेषां कटाक्षभूजाक्षेपादिभिः कार्यैः अनुभावः प्रतीतिपथमायाति। निर्वेद उत्कण्ठादिभिः सहकारिभिः पुष्टीकृतः रत्यादिभावः साक्षात्सम्बन्धेन प्रकृतरामादिनायके, शिक्षासंस्काराभ्यासवशात् च नटे आरोप्यमाणः सामाजिकैः रस इति उच्यते।



Scanned with CamScanner

संयोगात् अर्थात् विभावैः उत्पाद्योत्पादकभावसम्बन्धात् रसस्य उत्पत्तिः। अनुभावैः गम्यगमकभावसम्बन्धात् रसस्य अभिव्यक्तिः, व्यभिचारिभावैः पोष्यपोषकभावसम्बन्धात् रसस्य पुष्टिः भवति इति विभावादिभिः जनितः, अनुभावैः प्रतीतियोग्यकृतः, सहकारिभिरूपचित इति तस्य व्याख्यानात् ज्ञायते। उत्पाद्योत्पादकभावसंम्बन्धात् रसस्य उत्पत्तिर्भवति इति मतस्यास्य सारः।

भट्टलोल्लटः उत्तरमीमांसकः वेदान्ती वा। यथा वेदान्ते रात्रौ असर्पभूतायां रज्जौ पथिकः सर्पज्ञानं कृत्वा भीतो भवति तथा अत्रापि सहृदयः अप्रकृतरामसीतादिनटे रामसीतादिरतिज्ञानं कृत्वा रसोत्पत्तिं पश्यति। अस्य मतें इयमरुचिर्यत्-अनुकार्ये रामे, ततः शिक्षादिवशात् नटे रसस्य उत्पत्तिः इति यदुक्तं तदसमीचीनम्। यदि सामाजिकानां रसानन्दलाभो न स्यात् तर्हि कथं ते नाटकं पश्यन्ति काव्यं पठन्ति वा? अपि च रामादयः इदानीं न सन्ति अतः तत्र रसोत्पत्तिरसम्भवः। यदि मूले नास्ति कथं तदाश्रितनटे रसोत्पत्तिः स्यात्? अतः मतमिदमन्ये न स्वीकुर्वन्ति।

**श्रीशङ्कुकस्य मतसारः**—श्रीशङ्कुकः नैयायिकः। अतः अनुमानप्रमाण रीतिमाधारीकृत्य रसास्वादः तेन व्याख्यातः। तस्य मतेन संयोगात्-गम्यगमक (कार्यकारणभावो वा) भावसम्बन्धात्, निष्पत्तिः = अनुमितिः। अतएव विभावानुभावव्यभिचारिणः रसास्वादस्य अनुमापकाः कारणानि वा, रसः अनुमाप्यः कार्यं वा।

नाटके नटे रामत्वबुद्धिः चित्रतुरगन्यायेन भवति। इदं च सम्यङ्-मिथ्या-सन्देह-सादृश्येभ्यः चतुर्भ्यः ज्ञानेभ्यः भिन्नम्। नटरूपं रामं दृष्ट्वा-दर्शकस्य क्रमशः निम्नोक्तप्रकारेण ज्ञानं भवति यथा–

१. राम एव अयम् इति, अयमेव राम इति च सम्यग्ज्ञानम्।
२. न रामोऽयम् - मिथ्याज्ञानम्।





३. अयं रामः स्यात् न वा? - संशयज्ञानम्।
४. रामसदृशोऽयं नटः - सादृश्यज्ञानम्।
५. यथा चित्रे अश्वं दृष्ट्वा अश्वोऽयमिति व्यवहारः।

तथा नटे रामस्य आरोपः इति विलक्षणज्ञानम्। इदं पञ्चमं ज्ञानं तु मिथ्याज्ञानं न भवति, न वा सम्यग्ज्ञानं, किन्तु विलक्षणं भवति। तथैव नटे यदा रामज्ञानं भवति तदा नाटके 'सेयं ममाङ्गेषु'...इत्यादि श्लोकात् सम्भोगशृङ्गारं, 'दैवादहमद्य तया'... इत्यादि श्लोकात् विप्रलम्भशृङ्गारं नटे विलोक्य शिक्षाभ्यासवलात् अकृत्रिमत्वं तत्र सामाजिकाः अनुभवन्ति। लौकिकशृङ्गारस्य कारणकार्यसहकारिणः काव्ये विभाव-अनुभाव-व्यभिचारिभावाः उच्यन्ते। तैर्भावैः गम्यगमकभावसम्बन्धात् नटे रसस्य अनुमानं कुर्वन्ति। साधारणानुमानवन्नेतदनुमानमपितु वस्तुसौन्दर्यबलात् विलक्षणमिदमनुमानम्। यदि वा रामसीतादिविषयिणी रतिः प्रकृतपक्षे नटेषु नास्ति, तथाऽपि शिक्षासंस्कारवलात् अकृत्रिमतया प्रदर्शयन्तः नटाः रत्यादिस्थायिभावान् प्रकाशयन्ति। तत्र सामाजिकाः संस्कारवशात् आनन्दात्मकं रसमनुमानेन आस्वादयन्ति।

यथा- अनुमानेन शीतकाले कुज्झटिकायां धूमज्ञानं कृत्वा दर्शकाः अग्निं साधयन्ति तथा रामरूपानुकृते नटे रामज्ञानं कृत्वा रतेः अनुमानं कुर्वन्ति।

अस्मिन् श्रीशङ्कुकव्याख्याने अनुमानेन रसानुमितिरिति यदुक्तं तदरुचिकरम्। यतः प्रत्यक्षमेव ज्ञानं चमत्कारजनकं नानुमित्यादिः इति लोकप्रसिद्धिः। तथा च अनुमानजन्यज्ञानं परोक्षं न प्रत्यक्षमतः रसस्य साक्षात्कारः असम्भवः। कृत्रिमपदार्थात् अनुमानं न प्रमाणमित्यादिः अरुचिः समालोचकानां मनसि व्याख्यानादस्मादायाति।

**भट्टनायकस्य मतसारः**—रसस्य उत्पत्तिः न भवति। न वा रसस्य अनुमितिः, न वा व्यञ्जनया अभिव्यक्तिर्भवति, अपि तु रसस्य भुक्तिः



Scanned with CamScanner

भवति। संयोगात् = भोज्य-भोजक-भावसम्बन्धात्। निष्पत्तिः = रसभुक्तिः। काव्ये नाटके च अभिधाव्यापारेण लक्षणाव्यापारेण वा विभावादिबोधः न भवति। तत्र भावकत्वव्यापारेण सर्वे विभाव-अनुभाव-व्यभिचारिभावाः स्थायिनश्च साधारणीकृताः सन्तः अनुभवपथमायान्ति। अनेन अभिधा-भावकत्व-भोजकत्व-इति व्यापारत्रयं रसानुभवाय स्वीकृतम्।

तदा रजस्तमसी अभिभूय सत्त्वगुणस्योदयो भवति। सत्त्वस्याविर्भावात् आनन्दमयज्ञानं अन्यज्ञानविरहितं सत् रसमेव साक्षात्कारयति। तेन विभावदिभिः भोजकत्वव्यापारेण रसः सामाजिकैः भुज्यते।

सांख्याचार्योऽयं स्वशास्त्रपरम्परया रससूत्रं समीक्षति। यथा—ब्रह्मास्वादकाले अन्यज्ञानविरहितः सन् योगी सत्त्वगुणेन आनन्दमनुभवति तथा हि भावकत्वव्यापारेण सामाजिकः साधारणव्यक्तित्वेन विभावादीनामुपभोक्ता भवति। ततः भोजकत्वव्यापारेण आत्मस्थस्थायिभावं आस्वदते।

सांख्यमतेन सुखदुःखे अन्तः करणस्य धर्मौ, न तु पुरुषस्य। किन्तु पुरुषस्य अन्तःकरणेन सह सम्बन्धात् सुखदुःखयोः भोक्ता पुरुषो भवति। तथा हि सामाजिकानां विभावादयः न सन्ति, तथाऽपि तद्दर्शनात् हृदयस्थवासनालभ्यः स्थायी उद्दीपितो भवति। रसं च सामाजिकस्य भोग्यविषयं करोति इति सांख्येन सह समन्वयः।

मतेऽस्मिन् स्वतन्त्रतया भावकत्वव्यापारग्रहणे अरुचिः। यतः भावकत्वव्यापारेण विभावादीनां साधारणीकरणं, पुनश्च भोजकत्वव्यापारेण रसभुक्तिः प्रसङ्गगौरवमावहति।

**अभिनवगुप्तस्य व्यक्तिवादः**- अभिनवगुप्तः व्यञ्जनावादी। तस्य मतेन संयोगात् = व्यङ्ग्यव्यञ्जकसम्बन्धात्, निष्पत्तिः = रसाभिव्यक्तिः। अतएव विभावानुभावव्यभिचारिणः व्यञ्जकाः, रसः व्यङ्ग्यः।





साधारणतः लौकिकव्यवहारात् नायकनायिकादीनां परस्परासक्तिं विलोक्य सहृदयानां हृदये रत्यादिस्थायिभावाः संस्कारवशात् तिष्ठन्ति। यदा कश्चन काव्यं शृणोति अथवा नाटकं पश्यति तदा तु नायकनायिकानां अभिनयं तल्लीनतया विलोक्य विशेषभावं परिहाय साधारणभावं प्रति मतिं निदधाति। रत्यादीनां कारणत्वादिभावेन स्थिताः नायकादयः अलौकिकविभावादिपदेन ज्ञायन्ते। तेन च परिमितभावं संकीर्णभावं च विहाय दर्शकः इदं मम, इदं शत्रोः, अयं मम प्रियो न, स मम शत्रुः इत्यादिलौकिकाहङ्कारशून्यः सन् काव्यस्य वर्ण्यविषयं पश्यति। विशेषज्ञानं परिमितं किन्तु साधारणज्ञानम् अपरिमितं भवति। यदा रामचरितात्मक नाटके **रामस्य नायिका सीता न मम** इति विशेषज्ञानं भवति तदा रसास्वादः न सम्भवः। किन्तु तत्र साधारणनायकनायिकाज्ञानं तु रसास्वादस्य अनुकूलम्। तल्लीनतया यदा पाठकः काव्यं शृणोति नाटकं वा पश्यति तदा तस्य साधारणज्ञानं भवति। तेन साधारणज्ञानेन सहृदयहृदयस्थः पूर्वसंस्कारलभ्यः रत्यादिस्थायिभावः अभिव्यज्यते। अस्य विचारस्य प्रधानांशाः यथा-

१. **रामःसीताविषयकरतिमान्** इति विशेषज्ञानस्य लोपः।

२. **नायिकासाधारणज्ञानेन अहं रतिमान्** इति साधारणज्ञानस्योदयः।

३. तादृश्यामवस्थायां सहृदयः **विभावादिभिन्नं किमपि अन्यत् न जानाति**।

४. सहृदयः **स्वपरिमिततां विहाय साधारणदर्शकः भवति**। अर्थात् अहं गोविन्दः, हरिहरस्य पुत्रः, रमयाः पतिरित्यादिपरिमितज्ञानशून्यः सन् साधारणदर्शकभावं प्राप्नोति।

५. काव्यनाटकादपि साधारणतया **सर्वेषां सहृदयानां रत्यादिस्थायिनः उद्दीप्यन्ते**।

६. विभावादिभिः सह रत्यादिस्थायिभावानां चर्वणया **अलौकिकरसस्य आस्वादो** भवति।



Scanned with CamScanner

विभावादयः यदा तिष्ठन्ति तदा रसास्वादः। अपि च पानकरसन्यायेन रसानन्दलाभः। यथा- प्रपानकपानकाले स्वतन्त्रतया दधि-शर्करा-मरीचादीनां स्वादु नज्ञायते किन्तु मिलितमधुरता ज्ञायते। तथा हि विभावानुभावदिभिः सह रत्यादिस्थायिभावानां चर्वणाकाले स्वतन्त्रतया विभावादीनां ज्ञानं न भवति। किन्तु मिलितज्ञानं भवति। तदेव समुहालम्बनात्मज्ञानमुच्यते। रसः सम्मुखे परिस्फुरति, हृदये प्रविशति, शरीरं सर्वतो भावेन आलिङ्गति। विभावादिभिन्नमन्यत्सर्वं तिरोदधति, ब्रह्मास्वाद सदृशः रसास्वादश्च भवति। ब्रह्मास्वादकाले योगी केवलं ब्रह्म अनुभवति अत्र रसास्वादे तु रसेन सह विभावादीनां ज्ञानं भवति। अतः ब्रह्मास्वाद इव रसास्वाद उच्यते। आनन्दप्राप्तिस्तु उभयत्र अलौकिकी। अभिनवगुप्तः शैवागमस्य प्रत्यभिज्ञादर्शनवादी। अतः तदनुसारं रससूत्रस्य व्याख्यानं कृतम्।

१. भट्टलोल्लटस्य रससूत्रव्याख्याने रसबोधः सहृदयानां न भवति इति अरुचिः।

२. श्रीशङ्कुकोक्तेन अनुमानेन सहृदयानां रसास्वादनं न समीचीनं, यतः रसः प्रत्यक्षज्ञानेन सिध्यति। प्रत्यक्षवत् अनुमानं न सुखदायकम्।

३. साधारणीकरणार्थं भावकत्वव्यापारस्य रसास्वादनार्थञ्च भोजकत्वव्यापारस्य ग्रहणमिति व्यापारद्वयं स्वीकारे गौरवं भवति। अतः भट्टनायकस्य मते अरुचिः।

४. साधारणसहृदयत्वकल्पनया विभावादिभिः सह रत्यादीनामास्वादः रसाभिव्यक्तिश्च इति अभिनवगुतस्य मतं युक्तिसहं सर्वजनग्राह्यं च।

## रसस्य अलौकिकत्वम्

रसः न कार्यः- रसस्य कृते विभावादयः कारणानि भवन्ति इति धिया कदापि रसस्य कार्यत्वं न शङ्कनीयम्। यतः कारणस्य सद्भावे कार्यस्य





उत्पत्तिः इति साधारणनियमः। यथा- दण्डचक्रानामभावेऽपि घटस्य स्थितिः। तथाहि विभावादीनां विनाशेऽपि रसस्य सद्भावः सम्भवेत्। किन्तु विभावादीनामभावे रसस्य आस्वादो न भवति।

विभावादिभिः सह रसः समूहालम्बनात्मकः। अतः विभावदीनाम् अभावे रसाभिव्यक्तेरभावात् रसः न कार्यः। अतः उक्तं **विभावादि जीवितावधिरिति।**

**रसो न ज्ञाप्यः**- अन्धकारे स्थितस्य पूर्वसिद्धस्य वा वस्तुनः परिप्रकाश एव ज्ञाप्यपदवाच्यः। यथा अन्धकारगृहे भोजनमस्ति। भोक्ता गृहं प्रविश्य आलोकवर्त्तिकामाध्यमेन तस्य दर्शनं करोति। तत्र आलोकवर्त्तिका ज्ञापकः। भोजनं ज्ञाप्यम्। तथैव विभावादयः न ज्ञापकः, रसोऽपि न ज्ञाप्यः। यतः रसः पूर्वसिद्धो नास्ति। पूर्वसिद्धस्यैव ज्ञापनं भवति न तु असिद्धस्य। रसः विभावादिभिः सह व्यञ्जनया व्यञ्जितो भवति।

कारकज्ञापकभिन्नमन्यत् किमपि वस्तु लोके न दृश्यते इति शङ्का तु रसस्य अलौकिकसिद्धये भूषणम्। रसास्वादः न लौकिकः इति व्यञ्जनावादिनां मतम्।

रसः कार्यः स्यात्। गौणभावेन रसस्य कार्यत्वव्यवहारोऽपि न दोषः। यतः चर्वणा एव रसस्य कारणम्। सहृदयः यावत्कालं विभावादीनां चर्वणमालोचनं वा करोति तावत्कालं रसानदं प्राप्नोति। अन्यथा न। अतः उपचारात् = गौणतया रसः कार्यः इति वक्तुं शक्यते।

रसस्य ज्ञाप्यत्वमपि स्यात्। ब्रह्मास्वादलीनयोगिनः ज्ञानवत् रसस्य ज्ञानं ज्ञाप्यत्वं साधयति। लोके प्रत्यक्ष-अनुमान-उपमानप्रभृतिज्ञानेभ्यः भिन्नं यद् वेद्यान्तरसंस्पर्शरहितब्रह्मसाक्षात्कारकालिकापरिमितज्ञानम्, तथा नाट्यकाव्याद्यनुशीलनकाले सहृदयस्य तल्लीनतया अवस्थानं, तदुत्पन्नं ज्ञानमेव रसं ज्ञापयति।



Scanned with CamScanner

रसज्ञाने न सविकल्पकज्ञानं न वा निर्विकल्पकज्ञानं स्यात्। रसज्ञानं न निर्विकल्पकं यतः विभावादिभिः सह तस्य ज्ञानं भवति। निर्विकल्पकज्ञानं तु केवलमेव एकस्यैव शुद्धस्वरुपस्य ज्ञानम्। इदं निष्प्रकारकज्ञानमपि उच्यते। यथा जीवस्य ब्रह्मज्ञानकाले ब्रह्मातिरिक्तं कस्यापि ज्ञानं न भवति। स्वस्थूलशरीरस्य सूक्ष्मशरीरस्य च ज्ञानं न भवति। 'अहं ब्रह्मास्मि' इति ज्ञानमेव निर्विकल्पकज्ञानम्। अर्थात् जीवब्रह्मणोः एकत्वकल्पनम्। किन्तु रसास्वादकाले न केवलं रसस्य ज्ञानमपितु विभावादीनामपि ज्ञानं भवति ततः रसज्ञानं न निर्विकल्पकम्।

रसज्ञानं न च सविकल्पकम्। यतः चर्व्यमाणस्य अलौकिकानन्दमयस्य रसस्य ज्ञानं न सविकल्पकम्। सविशेषणं ज्ञानं सविकल्पकज्ञानमर्थात् नामजात्यादियोजनसहितं ज्ञानं सविकल्पकम्। घटपटादिज्ञानं सविकल्पकं यतः घट-पट-इत्यादिशब्देन तेषां व्यवहारः संम्भवः। किन्तु रसः अनुभवैकवेद्यः ज्ञानस्य विषयः। शब्देन रसानुभवस्य कथनमसम्भवात्।

**अत्रायं सारः**- पदार्थस्य दर्शनमात्रे यदा नाम-जात्यादि ज्ञानं भवति तदा तस्य सविकल्पकज्ञानं जातमिति उच्यते। रसास्वादः अनुभववेद्यत्वात् तस्य शब्दप्रकाश्यत्वमसम्भवः। अतः रसः न सविकल्पकज्ञानेऽन्तर्भवति। न च निर्विकल्पके विभावादिभिः सह समुहालम्बनात्मकत्वात्। अतएव निर्विकल्पक-सविकल्पकज्ञानाभ्यां भिन्नं किमपि ज्ञानं नास्ति यत्र रसज्ञानमन्तर्भवेदिति शङ्कायामुच्यते-इयं शङ्का रसस्य अलौकिकत्वसिद्धये उपकारिणी एव। अनेनैव प्रकारेण रसस्य अलौकिकत्वं श्रीमदभिनवगुप्तपादैः व्याख्यातम्। अत्र पादशब्दे बहुवचनप्रयोगात् मम्मटाचार्यस्यापि सम्मतिरस्ति इति सूचितो भवति।

गुप्तपाद इतिसर्पस्य नामान्तरम्। अभिनवाचार्याणां गुरुः वाल्यकाले अभिनवस्य तीक्ष्णवुद्धिं चापल्यं च विलोक्य तस्मै सर्प इति नाम्ना आह्वयतिस्म। तदर्थं मम्मटेन पाण्डित्योक्त्या गुप्तपादाः इति कथितम्।





## विभावादीनां समूहव्यञ्जकता

व्याघ्रादयः विभावाः एकस्यैव रसस्य विभावाः न सन्ति। ते साधारणविभावत्वेन अनेकरसानां विभावत्वं भजन्ते। यथा- भीरुः व्याघ्रात् विभेति, अतः भयानकरसे व्याघ्रस्य विभावत्वम्। वीरः व्याघ्रं दृष्ट्वा तं व्यापादयितुमिच्छति, अतः वीररसेऽपि व्याघ्रस्य विभावत्वं स्यात्। प्रथमतया यः व्याघ्रं पश्यति स चकितो भवति, अतः अद्भूतरसेऽपि व्याघ्रस्य विभावत्वं स्यात्। एक एव व्याघ्रः वर्णनवैशिष्ट्येन अनेकरसानां विभावत्वमाप्नोति। तथाहि अश्रुपातादयः अनुभावाः शृङ्गार-करुण-भयानकरसानामनुभावत्वेन चिन्ताप्रभृतयश्च शृङ्गारवीरभयानकानां व्यभिचारिभावत्वेन वर्ण्यन्ते। अतः तृणारणिमणिन्यायेन न केवलो विभावोऽनुभावोव्यभिचारिभावो वा रसस्य व्यञ्जकः अपितु त्रयः एव मिलितरुपेण दण्डचक्रादिन्यायेन व्यञ्जकाः। तस्मादेव कारणात् विभावानुभावव्यभिचारिभावाः द्वन्दसमासेन रसस्य व्यञ्जकत्वेन उक्ताः। पृथक्तया ते अनैकान्तिकभावेन अनेकरसानां व्यञ्जकाः किन्तु मिलितभावेन तेषाम् उपस्थापनात् एकस्यैव रसस्य व्यञ्जका इति सिद्धम्।

केषुचित् श्लोकवाक्येषु विभावात्, केषुचित् अनुभावात्, केषुचित् स्थलेषु च व्यभिचारात् रसाभिव्यक्तिरिव ज्ञायते। तत्र कथं विभावानुभावव्यभिचारिणां मिलितकारणत्वं स्यादिति शङ्कायामुच्यते-तत्र एकस्य शब्दोपात्ते अपरयोराक्षेपो भवति। अन्यथा रसाभिव्यक्तिः न स्यात्।

यथा- **वियदलिमलिनाम्बु**...इति उदाहरणे मुग्धानायिकायाः आलम्बनविभावः दयितः। उद्दीपनविभावश्च वर्षाकालः शब्देन वर्णितौ।

**परिमृदितमृणालीम्लानमित्यादि** श्लोके माधवविरहानलसंतप्तायाः माधव्याः शरीरं म्लानपङ्कजतुल्यम्। परिवारप्रार्थनाभिः नित्यक्रियासु प्रवृत्तिः। कपोलश्च वालगजदन्तखण्डशोभायुक्तः कलङ्कमुक्तचन्द्रसमो विभाति इति अनुभावानां वर्णनम्।



Scanned with CamScanner

अमरुशतकस्थे दूरादुत्सुकमागत...इत्यादिश्लोके कृतापराधस्य नायकस्य पुनः प्रत्यावर्त्तनेन मानिनीनायिकायाः चक्षुक्रियाः अत्र वर्णिताः। यथा- आगमनं विलोक्य उत्सुकता, वाक्यालापकाले विस्फारिता, आलिङ्गने क्रोधारुणता, वसनग्रहणे असूयया भ्रूकुटिः सङ्कुचिता, चरणनतौ वाष्पाम्बुयुक्तता च।

अत्र श्लोकत्रयेण क्रमशः प्रथमे विभावस्य, द्वितीये अनुभावस्य, तृतीये च व्यभिचारिभावस्य वर्णनमस्ति। तत्रापि विप्रलम्भशृङ्गारस्य स्पष्टतया अभिव्यक्तिर्भवति। अतः विभावोऽथवा अनुभावोऽथवा व्यभिचारिभावः 'कथं न पृथक्तया व्यञ्जको भवेदिति शङ्का न करणीया। यदा असाधारणतया विभावादीनां वर्णनं भवति तदा एकस्य शब्दोपात्ते अपरयोः द्वययोः आक्षेपः स्वीकर्त्तव्यः। तेन नैकान्तिकत्वं स्यात्। अर्थात् यत्र केवलः विभाव उक्तः तत्र अनुभाव-व्यभिचारिभावौ आक्षिप्तौ स्तः। तथा अनुभावव्याभिचारि भावस्थलेऽपि कल्पनीयम्।

उक्तं च दर्पणकारेण-

सद्भावश्च विभावादेर्द्वयोरेकस्य वा भवेत्।
झटित्यन्यसमाक्षेपे तदा दोषो न विद्यते॥

——





## रसभेदाः

वाग्देवतावतारो मम्मटः रसानां नवत्वं स्वीकृत्य नवरसानां नामानि उल्लिखति। आदौ भरतमुनिमार्गानुसारेण तेषामष्टरसानां नामानि आह। तेषामुदाहरणादिकं न प्रदर्श्य निर्वेदस्थायिभावात्मकं शान्तरसं सोदाहरणं प्रस्तौति यथा-

**शृङ्गारहास्यकरुणरौद्रवीरभयानकाः।**
**बीभत्साद्भुतसंज्ञौ चेत्यष्टौ नाट्ये रसाः स्मृताः।**
**निर्वेदस्थायिभावोऽस्ति शान्तोऽपि नवमो रसः॥**

कविराजः विश्वनाथः स्वसाहित्यदर्पणे वात्सल्यभावस्य रसान्तर्भावविषये महतीं चर्चां कृत्वा **मुनीन्द्रसम्मतो वात्सल्यरसः** इति स्वाभिमतं प्राकटयत्। रूपगास्वामिरचिते उज्ज्वलनीलमणिग्रन्थे भक्तिरसस्य साङ्गोपाङ्गतया विचारो दृश्यते। किन्तु **रतिर्देवादिविषया व्यभिचारी तथाञ्जित भावः प्रोक्तः** इत्यादिकारिकया भक्तिः भावध्वनिः स्यान्न तु रसः इति मम्मटादीनां मतं स्पष्टीभवति।

स्थितेषु रसविशेषेषु केचित् तेषामपि प्राधान्याप्राधान्यविचारं कुर्वन्ति। भरतमुनिस्तु शृङ्गार-रौद्र वीर-बीभत्साः क्रमशः हास्य-करुण-अद्भुत-भयानकानां जनकरसाः इति प्राह। यथा—

शृङ्गाराद्धि भवेद्धास्यो रौद्राच्च करुणो रसः।
वीराच्चैवाद्भुतोत्पत्तिः बीभत्साच्च भयानकः॥
शृङ्गारानुकृतिर्या तु स हास्यस्तु प्रकीर्त्तितः।
रौद्रस्यैव च यत्कर्म स ज्ञेयः करुणोरसः॥
वीरस्यापि च यत्कर्म सोऽद्भुतः परिकीर्त्तितः।
बीभत्सदर्शनं यच्च ज्ञेयः स तु भयानकः॥

नाट्यशास्त्रे ६/३९-४०-४१



Scanned with CamScanner

सरस्वतीकण्ठाभरणे रसविषये भोजराजेन उक्तं यता-

श्रृङ्गारवीरकरुणरौद्राद्भुतभयानकाः।

बीभत्सहास्यप्रेयांसः शान्तोदात्तोद्धताः रसाः।५/१६/४

दशरूपककारस्तु शान्तरसं न स्वीकरोति। तन्मते भरतोक्ताः श्रृङ्गारदयः अष्टावेव रसाः। रसानां प्राधान्याप्राध्यान्ये चित्तवृत्ति-आधारेण कल्पिते। यथा-

स्वादः काव्यार्थसम्भेदादात्मानन्दसमुद्भवः।
विकासविस्तरक्षोभविक्षेपैः स चतुर्विधः।।
श्रृङ्गारवीरबीभत्सरौद्रेषु मनसः क्रमात्।
हास्याद्भुतभयोत्कर्षकरुणानां त एव हि।।

दशरूपके ४/४३-४५

महाकविः भवभूतिः करुणरसस्य प्राधान्यं स्वीकृत्य अन्येषां तस्यैव विवर्त्तत्वं स्वीकरोति यथा-

एको रसः करुण एव निमित्तभेदात्
भिन्नः पृथक् पृथगिवाश्रयते विवर्त्तान्।
आवर्त्तबुद्बुदतरङ्गमयान् विकारान्
अम्भोर्यथा सलिलमेव हि तत्समस्तम्॥

उत्तररामचरिते-३/४७

वत्सलस्य रसत्वं स्वीकुर्वता भोजराजेन श्रृङ्गारप्रकाशे दशरसेषु श्रृङ्गारस्यैव रसत्वं सर्वोत्कृष्टमिति विचारितम्। यथा-

श्रृङ्गारवीरकरुणाद्भूतरौद्रहास्य-
बीभत्सवत्सलभयानकशान्तनाम्नः।
आम्नासिषुर्दश रसान् सुधियो वयं तु
श्रृङ्गारमेव रसनात् रसमामनामः॥ श्रृङ्गारप्रकाशे १/१६





विश्वनाथकविराजस्य पितामहेन नारायणपण्डितेन अद्भुतस्य रसत्वं प्राधान्यं च स्वीकृतम्। यथा- साहित्यदर्पणे तृतीयपरिच्छेदे-

रसे सारश्चमत्कार सर्वत्राप्यनुभूयते।
तच्चमत्कारसारत्वे सर्वत्राप्यद्भुतो रसः।
तस्माददद्भुतमेवाह कृती नारायणो रसम्॥

अभिनवगुप्तस्तु शान्तरसस्य सर्वरसमूलत्वं स्वीकरोति। यथा- अभिनवभारत्यां-

स्वं स्वं निमित्तमासाद्य शान्ताद् भावः प्रवर्त्तते।
पुनर्निमित्तापाये च शान्त एवोपलीयते॥

## रसानां प्राधान्याप्राधान्ये तथा संख्या

**भरतः**- नाट्ये अष्टौ रसाः- श्रृङ्गारः, हास्यः, करुणः, रौद्रः, वीरः, भयानकः, बीभत्सः, अद्भुतः।

**भामहवामनादयः**- रसोऽपि अलङ्कारः यथा- रसवत्, प्रेयः, उर्ज्वस्वी, समाहितः।

**आनन्दवर्द्धनः**- भरतोक्ताः अष्टरसाः + शान्तः।

**अभिनवगुप्तः**- नवरसाः। शान्त एव मुख्यः।

**मम्मटः**- नवरसाः। वर्णनौचित्यानुसारेण सर्वेषां प्राधान्यं विद्यते।

**भोजराजः**- दशरसाः। श्रृङ्गारादयः नव + वत्सलः। श्रृङ्गारस्य प्राधान्यम्।

**भवभूतिः**- नवरसाः। करुणस्य प्राधान्यम्।

**रूपगोस्वामी**- दशरसाः। श्रृङ्गारदयः नव + भक्तिः।

**विश्वनाथः**- दशरसाः। श्रृङ्गारादयः नवरसाः। वात्सल्योऽपि रसः स्यात्।

**पण्डितराजः**- नवरसाः। मुनिवचनस्य समर्थकः।



Scanned with CamScanner

## वर्णदेवतानिर्णायिका रससारणिः

| रसः | स्थायिभावः | वर्णः | देवता |
|---|---|---|---|
| शृङ्गारः | रतिः | श्यामः | विष्णुः |
| हास्यः | हासः | सितः | प्रमथः |
| करुणः | शोकः | कपोतः | यमः |
| रौद्रः | क्रोधः | रक्तः | रुद्रः |
| वीरः | उत्साहः | गौरः | महेन्द्रः |
| भयानकः | भयः | कृष्णः | कालः |
| बीभत्सः | जुगुप्सा | नीलः | महाकालः |
| अद्भुतः | विस्मयः | पीतः | ब्रह्म |
| शान्तः | निर्वेदः | स्वच्छः | बुद्धः |

वर्णदेवतादिप्रसङ्गे साहित्यदर्पणस्य तृतीयपरिच्छदे नाट्यशास्त्रस्य षष्ठपरिच्छदे च महान् विचारो दृश्यते। स्थायिभावप्रसङ्गस्तु भरतानन्दवर्धन-मम्मटविश्वनाथजगन्नाथादीनां ग्रन्थे स्पष्टीकृतः।

### केषाञ्चिद्रसानां प्रभेदाः

शृङ्गारः

सम्भोगः-१ विप्रलम्भः-५

विप्रलम्भः: अभिलाषहेतुकः विरहहेतुकः ईर्ष्याहेतुकः प्रवासहेतुकः शापहेतुकः





वीरः

युद्धवीरः दयावीरः धर्मवीरः दानवीरः

(दर्पणकारस्य मते वीरस्य चत्वारो भेदाः, मम्मटस्तु युद्धवीरस्यैव विचारं करोति, अन्ये त्रयः भावध्वनिस्थानीयाः इति तस्य मतम्)।

हास्यस्य षड्भेदा :-

स्मितम्, हसितम्-ज्येष्ठानाम्

विहसितम् उपहसितम्—मध्यमानाम्

अपहसितम्, अतिहसितम्—अधमानाम्।

**एकोनपञ्चाशद्भावाः-**

| | |
|---|---|
| स्थायिभावाः | - ८ |
| व्यभिचारिभावाः | - ३३ |
| सात्विकभावाः | - ८ |

**भावानामाधारेण रसानां प्रभेदाः** (नाट्यशास्त्रे - ६/७७-८२)

| | |
|---|---|
| शृङ्गारः- (३) | वागात्मकः, (speech), नेपथ्यात्मकः (dress), क्रियात्मकः (action)। |
| हास्यः- (३) | अङ्गात्मकः (body), नेपथ्यात्मकः, वाक्यात्मकः। |
| रौद्रः- (३) | अङ्गात्मकः (body), नेपथ्यात्मकः, वाक्यात्मकः। |
| करुणः- (३) | धर्मोपघातजः, अर्थोपचयजः, शोककृतः। |
| वीरः- (३) | दानवीरः, धर्मवीरः, युद्धवीरः। |
| भयानकः- (३) | व्याधिजः, अपराधजः, त्रासजः। |



Scanned with CamScanner

बीभत्सः- (२) क्षोभजः, रुधिरादिदर्शनजः, विष्ठाकृमिप्रभृतिदर्शनात् उद्वेगजः।

अद्भुतः- (२) दिव्यदर्शनात् दिव्यजः, लौकिकानन्दात् लोकानन्दजः।

## नवरसानाम् उदाहरणानि

**शृङ्गारः**- सम्भोगविप्रलम्भभेदेन शृङ्गारो द्विविधः। तत्र सम्भोगशृङ्गारः परस्परावलोकन-आलिङ्गन-चुम्बन-अधरपानादिभेदैः अनेकप्रकारः अनन्तश्च। अतः तस्य गणनासम्भवात् एक एव भेदः स्वीक्रियते।

**सम्भोगशृङ्गारः**

उदाहरणं यथा-

शून्यं वासगृहं विलोक्य शयनादुत्थाय किञ्चिच्छनै-
र्निद्राव्याजमुपागतस्य सुचिरं निर्वर्ण्य पत्युर्मुखम्।
विस्रब्धं परिचुम्ब्य जातपुलकामालोक्य गण्डस्थलीं
लज्जानम्रमुखी प्रियेण हसता बाला चिरं चुम्बिता॥

अमरुशतकस्य पद्यमिदम्। पतिगृहं प्रति नवागता मुग्धा नायिका शयनगृहे पत्या सह शेते। व्याजनिद्रागतं पतिं सम्यग् विलोक्य लज्जाशीलेयं यदा तं चुम्बति तदा पत्युः गण्डस्थलस्य पुलकितभावं दृष्ट्वा लज्जिता भवति। तस्मिन्नेव काले सहसा पतिः तामालिङ्ग्य वहुकालं चुम्बनैः तोषयति।

अत्र श्लोके आलम्बनविभावः- नायकः।
उद्दीपनविभावः- शून्यवासगृहम्, व्याजनिद्रा च।
अनुभावः- नायिकायाः चुम्बनम्, मुखावलोकनम्।
व्यभिचारिभावः- लज्जा, हर्षः।
स्थायिभावः- रतिः।





रसः- सम्भोगशृङ्गारः।

श्लोकेऽस्मिन् नायकविषयिण्याः नायिकानिष्ठायाः रतेरुद्रेक एव चर्वणाविषयः। तस्माच्च सामाजिके रसनिष्पत्तिः।

२. नायिकानिष्ठां रतिं प्रदर्श्य नायकारब्धं शृङ्गारमुदाहरति। कथं नायिकानिष्ठायाः प्राथम्यमिति चेत् उच्चते-**पूर्वं रक्ता भवेन्नारी पुमान् पश्चात् तदिङ्गितैः** इति अभियुक्तवचनं प्रमाणम्। यथा-

**त्वं मुग्धाक्षि विनैव कञ्चुलिकया धत्से मनोहारिणीं**
**लक्ष्मीमित्यभिधायिनि प्रियतमे तद्वीटिकासंस्पृशि।**
**शय्योपान्तनिविष्टसस्मितसखीनेत्रोत्सवानन्दितो**
**निर्यातः शनकैरलीकवचनोपन्यासमालीजनः॥**

पद्यमिदम् अमरुकशतकस्य। स्तनमर्दनादिकं समाप्य रन्तुमुद्यतस्य नायकस्य आलिङ्गनव्यवधानभूतकञ्चुक्याः मोचनं वर्णयति कविः। 'हे सुन्दरनयने प्रिये! कञ्चुकीं विना त्वं चित्ताकर्षणशीलां शोभां धारयसि' इति वदता प्रियेण वस्त्रग्रन्थिमोचनार्थं यदा प्रयासः क्रियते तदा शय्यापार्श्वस्थाः हसन्त्यः सख्यः लज्जावशात् विभिन्नकार्यछलेन पलायिताः।

अत्र आलम्बनविभावः- मुग्धा स्त्री।
उद्दीपनविभावः- नयनसोन्दर्यम्, अङ्गसौष्ठवम्।
अनुभावः- आभाषणम्, वस्त्रग्रन्थिस्पर्शः।
व्यभिचारिभावः- उत्कण्ठा।
स्थायिभावः- रतिः।
रसः- सम्भोगशृङ्गारः।

**विप्रलम्भशृङ्गारः** (पञ्चविधः)

अभिलाषहेतुकः- अप्राप्तसमागमयोः अन्योन्यप्राप्तीच्छा, पूर्वरागमात्रं वा अस्य उदाहरणं-



Scanned with CamScanner

**प्रेमार्द्राः प्रणयस्पृशः परिचयादुद्गाढरागोदया-**
**स्तास्ता मुग्धदृशो निसर्गमधुराश्चेष्टा भवेयुर्मयि।**
**यास्वन्तःकरणस्य वाह्यकरणव्यापाररोधी क्षणा-**
**दाशंसापरिकल्पितास्वपि भवत्यानन्दसान्द्रो लयः॥**

मालतीमाधवनाटकस्य पञ्चमाङ्के नायिकां मालतीं प्राप्तुं श्मशानसाधने प्रवृत्तस्य नायकमाधवस्य उक्तिः। अत्र नायकः मालत्याः पूर्वानुभूताः दर्शनहसितादिचेष्टाः स्वायत्तीकरणार्थं चेष्टते। मालत्याः ताः चेष्टाः चक्षुरादिवाह्येन्द्रियाणि जडीकुर्वन्ति। किन्तु ताः अन्तरिन्द्रिये मनसि अलौकिकानन्दं जनयन्ति।

अत्र मालती आलम्बनविभावः, तद्विलासाः उद्दीपनविभावः, आशंसा/आकांक्षा अनुभावः, उत्कण्ठा व्यभिचारिभावः, रतिः स्थायिभावः, विप्रलम्भशृङ्गारो रसः।

(२) विरहहेतुकः विप्रलम्भः। विरहस्य कारणत्रयं सम्भवेत् यथा- एकदेशरतिः एकतरस्य अननुरागो वा। दैवप्रतिबन्धः। गुरुलज्जावशाद् विरहः गुरुलज्जादिकारणात् विरहस्य उदाहरणं यथा-

**अन्यत्र व्रजतीति का खलु कथा, नाप्यस्य तादृक् सुहृद्**
**यो मां नेच्छति नागतश्च, हहहा कोऽयं विधेः प्रक्रमः।**
**इत्यल्पेतरकल्पनाकवलितस्वान्ता निशान्तान्तरे**
**बाला वृत्तविवर्त्तनव्यतिकरा नाप्नोति निद्रां निशि॥**

इदं दत्तसङ्केतस्य नायकस्य गुरुलज्जादियत्किञ्चित्कारणात् रात्रावनागमने विरहोत्कण्ठितानायिकायाः नायकस्य अनागमनकारण-आविष्कारात्मकं वचनम्। मम नायकः अन्यत्र न गच्छेत्। यतः तस्य प्रियतमा अन्या नास्ति। स मां न इच्छति इति न। तथापि तस्य अनागमनस्य किं वा कारणं स्यात्? अहो विधेः प्रक्रमः। कारणाभावेऽपि कार्योत्पत्तिः।





इत्थं वहुचिन्तयन्ती बाला रात्रौ निद्रां नाप्य केवलं शङ्कायां पार्श्वपरिवर्तनं कृत्वा लुठति।

अत्र अनागतपतिः आलम्बनविभावः, अन्यत्र गमनम् उद्दीपनविभावः, विवर्त्तनमनुभावः, विस्मयः दैन्यं च व्यभिचारिभावः। रतिः स्थायिभावः। विप्रलम्भशृङ्गारो रसः।

प्रवासस्य मध्ये विरहस्य नान्तर्भावः। यतः प्रवासे नायकः दूरदेशे तिष्ठति। कथमपि समागमः असम्भवः। तत्र च नायिका प्रोषितभर्तृका। किन्तु विरहविप्रलम्भे नायिका विरहोत्कण्ठिता। नायकः समीपतरस्थाने तिष्ठति। गुरुलज्जादिकारणात् तस्य अनागमनम्। तत्रापि समागमस्य विलम्बेनाऽपि सम्भवात्। विरहोत्कण्ठितायाः लक्षणमुक्तं यथा-

आगन्तुं कृतचित्तोऽपि दैवान्नायाति यत्प्रियः।
तदनागमदुःखार्त्ता विरहोत्कण्ठिता मता।।

(३) ईर्ष्याहेतुकविप्रलम्भस्योदाहरणम्—

अमरुशतकस्य पद्यमिदम्-

**सा पत्युः प्रथमापराधसमये सख्योपदेशं विना**
**नो जानाति सविभ्रमाङ्गवलनावक्रोक्तिसंसूचनम्।**
**स्वच्छैरच्छकपोलमूलगलितैः पर्यस्तनेत्रोत्पला**
**बाला केवलमेव रोदिति लुठल्लोलालकैरश्रुभिः॥**

नवविवाहितायाः सख्याः दुरवस्थां संसूचयन्ती काचित् अन्यासां सखीनां पुरतः वक्ति-अस्माकं सखी स्वपत्युः अन्यनायिकासक्तदोषं ज्ञात्वाऽपि अस्माकमुपदेशाभावात् विभ्रमाङ्गवलनावक्रोक्तिकथनादिकं न कृतवती। केवलं महता दुःखेन क्रन्दति। येन लोतकैः चूर्णकुन्तलः आर्द्रीभूय गण्डस्थले विपर्यस्ततया पतितः।



Scanned with CamScanner

अत्र अपराधी पतिः आलम्बनविभावः, अपराधः उद्दीपनविभावः, रोदनम् अनुभावः, असूया व्यभिचारिभावः, रतिः स्थायिभावः। तेभ्यः ईर्ष्याहेतुकविप्रलम्भः सहृदयानामास्वाद्यो भवति।

(४) प्रवासहेतुकः विप्रलम्भः- प्रवासः अनुरक्तयोः नायिकानायकयोः कार्यान्तरवशात् विभिन्नदेशप्राप्तिः, तज्जन्यो विच्छेदः प्रवासहेतुको विप्रलम्भः। उदाहरणं—

**प्रस्थानं वलयैः कृतं प्रियसखैरस्त्रैरजस्रं गतं**
**धृत्या न क्षणमासितं व्यवसितं चित्तेन गन्तुं पुरः।**
**यातुं निश्चितचेतसि प्रियतमे सर्वे समं प्रस्थिता**
**गन्तव्ये सति जीवित! प्रियसुहृत्सार्थः किमु त्यज्यते॥ ३५॥**

अमरुकशतकस्य पद्यमिदम्। प्रवत्स्यत्पतिका (यस्याः पतिः वहिः गन्तुमुद्यताः) स्वजीवनं संवोध्य साभिमानात्मकं वचनं वदति यथा- नायकस्य गमनं श्रुत्वा करकङ्कणः करात् गलितः। अश्रुधारा नयनात् निर्गच्छति। धैर्यं क्षणमपि न स्थातुं समर्थम्। चित्तं पूर्वमेव तेन सह गन्तुं उद्यतम्। अतएव हे जीवन! किमर्थं त्वमपि न व्रजसि। प्रियेण सह गमनसौख्यं कथं नानुभवसि यतः प्रियगमनात्परं त्वं नूनं गमिष्यसि।

अर्थात् प्रियं विना स्थातुं न शक्नोषि अवश्यं मरिष्यामि इति प्रोषितभर्तृकायाः उक्तिः।

अत्र प्रियतमः आलम्बनम्, तत्प्रयाणादिकमुद्दीपनम्,
शरीरकार्श्यादयः अनुभावाः, चिन्ता व्यभिचारिभावः
रतिः स्थायिभावः। प्रवासहेतुकविप्रलभ्यशृङ्गारो रसः।।

(५) शापहेतुकविप्रलम्भः- 'एतावन्तं कालं तव नायिकासंयोगो न भवतु' इत्यादिरूपः सिद्धपुरुषादिवचनविशेषः अभिशापः। तज्जन्यः विरहः। यथा- कालिदासस्य मेघदूते-





**त्वामालिख्य प्रणयकुपितां धातुरागैः शिलाया-**
**मात्मानन्ते चरणपतितं यावदिच्छामि कर्तुम्।**
**अस्त्रैस्तावन्मुहुरुपचितैर्दृष्टिरालुप्यते मे**
**क्रूरस्तस्मिन्नपि न सहते सङ्गमं नौ कृतान्तः॥ ३६॥**

अत्र यक्षाधिपकुवेरशापात् प्रियाविरहदुःखमनुभवतः यक्षस्य विरहः वर्णितः। धातुरागैः शिलायां प्रणयकुपितनायिकायाः चित्रं विरचय्य यक्षः यदा नायिकापादयोः पतितुमिच्छति तदा शोकातिशयात् लोतकपूर्णचक्षुः चित्रेऽपि प्रियां द्रष्टुं न समर्थो भवति।

अत्र नायिका आलम्बनम्। तत्प्रणयकोपः उद्दीपनम्, चरणपातेच्छादिः अनुभावः, कृतान्ते असूया व्यभिचारिभावः, रतिः स्थायिभावः। शापहेतुकविप्रलम्भशृङ्गारो रसः।

**हास्यरसस्य उदाहरणम्-**

**आकुञ्च्य पाणिमशुचिं मम मूर्ध्नि वेश्या**
**मन्त्राम्भसां प्रतिपदं पृषतैः पवित्रे।**
**तारस्वनं प्रथितथूत्कमदात्प्रहारं**
**हा हा हतोऽहमिति रोदिति विष्णुशर्मा॥ ३७॥**

विष्णुशर्मणः हास्यावस्थां वर्णयन् कश्चन वक्ति- अयं विष्णुशर्मा एकदा क्रन्दन् तारस्वरेण वदति—अहो! मम मन्त्राम्भसा पवित्रमूर्ध्नि वेश्या अशुचिं पाणिम् आकुञ्च्य प्रहारं कृतवती। तथा थुत्कं पातयति। अस्याः प्रहारेण मृतोऽस्मि मृतोऽस्मि इति च वदति।

अत्र विष्णुशर्मा आलम्बनविभावः, तस्य रोदनम् उद्दीपनविभावः, स्मितातिहसितरोदनादयः उत्तममध्यमाधमेषु अनुभावाः, द्रष्टुरावेगचापल्यादयः व्यभिचारिभावाः, हासः स्थायिभावः। तेभ्यः हास्यरसश्च सहृदयानामास्वाद्यो भवति।



Scanned with CamScanner

करुणस्य उदाहरणम्-

**हा मातस्त्वरिताऽसि कुत्र किमिदं हा देवताः क्वाऽऽशिषः**
**धिक् प्राणान् पतितोऽशनिर्हुतवहस्तेऽङ्गेषु दग्धे दृशौ।**
**इत्थं घर्घरमध्यरुद्धकरुणाः पौराङ्गनानां गिर-**
**श्चित्रस्थानपि रोदयन्ति शतधा कुर्वन्ति भित्तीरपि॥ ३८॥**

कस्याश्चित् राजपत्न्याः स्वर्गमनानन्तरं तत्परिजनविलापोक्तिः- जयन्त भट्टस्तु काश्मीरराजजननीमरणे भट्टनारायणस्य विलोपोक्तिरिति वदति। भद्रेश्वरो मदालसायाः स्वर्गमने पौरवधूनां क्रन्दनमिदं वदति। यथा- पौराङ्गनानां घर्घरस्वरात्मकं क्रन्दनम् आलेख्यगतानि अचेतनचित्राणि अपि रोदयति। सचेतनान् शतखण्डान् कुर्वन्ति किम् तासां विलापोक्तिः ? यथा- भोमातः! कुत्र गमनाय त्वरितासि। अर्थदानादिभिः प्राप्तः देवताब्राह्मणादीनामाशीषः क्वः गतः ? तव कुसुमकोमले शरीरे वज्रतुल्याग्नेः पतनं वयं पश्याम, इति धिक् नः।

अत्र मृतनायिका आलम्बनम्, तस्याः दहनम् उद्दीपनम्, रोदनमनुभावः, दैन्यग्लानिमूर्च्छादयो व्यभिचारिभावः। शोकः स्थायिभावः। अभिज्ञे सामाजिके शोकोत्थः करुणः ध्वन्यते।

रौद्ररसस्य उदाहरणम्-

**कृतमनुमतं दृष्टं वा यैरिदं गुरुपातकं**
**मनुजपशुभिर्निर्मर्यादैर्भवद्भिरुदायुधैः।**
**नरकरिपुणा सार्द्धं तेषां सभीमकिरीटिना-**
**मयमहमसृङ्मेदोमांसैः करोमि दिशां बलिम्॥ ३९॥**

वेणीसंहारनाटके तृतीयाङ्के द्रोणवधानन्तरं क्षुब्धस्य अश्वत्थाम्नः उक्तिः- ये मम पितुः द्रोणगुरोर्वधाख्यमहापातकस्य द्रष्टारः सात्यकादयः, अनुमन्ता श्रीकृष्णः, कर्त्ता धृष्टद्युम्नः, एते सर्वे मनुष्यरूपधारिपशवः।





धर्माधर्मविचारमूढाः। मर्यादाहीनाः उद्यतास्त्राश्च। भीमार्जुनादिभिः सह सर्वान्, श्रीकृष्णं च व्यापाद्य दिक्षु वलिं समर्पयामि।

अत्र अपकारिणः अर्जुनादयः आलम्बनविभावाः, पितृहन्तृत्वशस्त्राद्युद्यमनम् उद्दीपनविभावः, प्रतिज्ञा अनुभावः, अन्यनैरपेक्ष्यगम्यगर्वः व्यभिचारिभावः, क्रोधः स्थायिभावः। सहृदयानां हृदये क्रोधप्रकृतिकः रौद्ररसः ध्वन्यते।

वीररसस्य उदाहरणम्-

**क्षुद्राः सन्त्रासमेते विजहत हरयः क्षुण्णशक्रेभकुम्भा**
**युष्मद्देहेषु लज्जां दधति परममी सायका निष्पतन्तः।**
**सौमित्रे! तिष्ठ पात्रं त्वमसि न हि रुषां नन्वहं मेघनादः**
**किञ्चिद्भ्रूभङ्गलीलानियमितजलधिं राममन्वेषयामि॥ ४०॥**

हनुमन्नाटके एकादशेऽङ्के रावणसूतस्य इन्द्रजितः रामान्वेषणात्मोक्तिः। यथा- हे पराक्रमहीनाः नीचमर्कटाः! यूयं भयं परित्यजत, यतो मे शराः इन्द्रगजस्य ऐरावतस्य कुम्भस्थलविदारकाः, अतः भवतां शरीरे ते पतितुं लज्जन्ते। हे लक्ष्मण! त्वमपि शान्तो भव। त्वया सह योद्धुं नाहमुत्सहे। यतोऽहं मेघनादः। अहं तं वीरं रामचन्द्रम् अन्वेषयामि, यस्य पलकपातेन सागरे सेतुबन्धः निर्मितः।

अत्र रामचन्द्रः आलम्बनम्, तत्सागरबन्धनम् उद्दीपनम्, क्षुद्रेषु उपेक्षा रामे च प्रतिस्पर्धा अनुभावः, गर्वः व्यभिचारिभावः, उत्साहः स्थायिभावः। तेभ्यः ध्वनितः वीररसः सहृदयैरनुभूयते।

काव्यप्रकाशकारस्य मते वीरतायाः प्रकृतप्रदर्शनं सर्वजनोत्साहकरं युद्धस्थलं भवति। अतः रसास्वादनं केवलं युद्धवीरस्य वर्णनातः समीचीनं स्यात्। अन्ये दया-धर्म-दानवीरेषु यः उत्साह अवलोक्यते स उत्साहस्तु भावध्वनेः विषयः।



Scanned with CamScanner

भयानकरसस्य उदाहरणम्-

**ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने बद्धदृष्टिः**
**पश्चार्धेन प्रविष्टः शरपतनभयाद् भूयसा पूर्वकायम्।**
**दर्भैरर्द्धावलीढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा**
**पश्योदग्रप्लुतत्वाद्वियति बहुतरं स्तोकमुर्व्यां प्रयाति॥ ४१॥**

अभिज्ञानशाकुन्तले प्रथमाङ्के राज्ञः शरपाताद्भीतस्य धावमानमृगस्य वर्णनम्। राजा सूतं वदति। पश्य! अयं मृगः ग्रीवाभङ्गं विधाय वारम्वारं नो रथं पश्यति। शरपतनभयात् पश्चाद्भागः शरीराग्रे प्रविष्टः इव संलक्ष्यते श्रमश्रान्तमुखात् अर्द्धावलीढदर्भाः मार्गे पतिताः। तेन मार्गः दर्भसंकीर्णः। द्रुतधावनकारणात् उर्व्यां स्वल्पकालः व्योम्नि च वहुकालः तस्य शरीरस्थितिः।

अत्र राजा-आलम्बनविभावः, मृगानुसरणम् उद्दीपनविभावः, स्यन्दने वद्धदृष्टिप्रभृतयः अनुभावाः, शङ्कात्रासादयश्च व्यभिचारिणः, भयः स्थायिभावः। तेभ्यः ध्वनितः भयानकरसः सहृदयवेद्यो भवति।

बीभत्सरसस्य उदाहरणम्-

**उत्कृत्योत्कृत्य कृत्तिं प्रथममथ पृथूत्सेधभूयांसि मांसा-**
**न्यंसस्फिक्पृष्ठपिण्ड्याद्यवयवसुलभान्युग्रपूतीनि जग्ध्वा।**
**आर्त्तः पर्यस्तनेत्रः प्रकटितदशनः प्रेतरङ्कः करङ्का-**
**दङ्कस्थादस्थिसंस्थं स्थपुटगतमपि क्रव्यमव्यग्रमत्ति॥ ४२॥**

मालतीमाधवनाटकस्य पञ्चमाङ्के प्रेतरङ्कस्य शवभक्षणं वर्णयन् माधवो वदति- क्षुधातुरोऽयं पर्यस्तनेत्रः प्रकटितदशनः प्रेतरङ्कः प्रथमं शवात् चर्म निष्काष्य अंसस्फिक्पृष्ठपिण्ड्याद्यवयवस्थमांसं खादति। ततः स्वक्रोडस्थशवात् अस्थिमध्यस्थमासं स्वल्पं स्वल्पं शनैः शनैः खादति। (प्रेतरङ्कस्य क्रोडे एकः शवः, समीपे च अपरः शवो वभूवतुः)

अत्र शवः प्रेतरङ्को वा आलम्बनम्, चर्मकर्त्तनं मांसभक्षणादिकमुद्दीपनम्,





तद्दृष्ट्वा नासाकुञ्चनादिकमनुभावः, उद्वेगादयः व्यभिचारिभावाः, जुगुप्सा स्थायिभावः। एभ्यः सहृदयः वीभत्समास्वादयति।

विशेषः- रतिशोकादीनाम् आलम्बनमुद्दीपनं च यथा स्पष्टतया प्रकाश्येते न तथा हासजुगुप्सयोः। हासजुगुप्सयोः आलम्बनमेव स्पष्टीभवति किन्तु उद्दीपनादिकं तु प्रसङ्गानुसारेण आक्षिप्यते।

अद्भुतरसस्य उदाहरणम्-

**चित्रं महानेष वतावतारः क्व कान्तिरेषाऽभिनवैव भङ्गिः।**
**लोकोत्तरं धैर्यमहो प्रभावः काऽप्याकृतिर्नूतन एष सर्गः॥ ४३॥**

वामनावतारिणं विष्णुं विलोक्य बलिः चिन्तयति—अयं लोकोत्तरः महापुरुषः। आनन्दस्य विषयः धर्मप्रवर्त्तनार्थमेव अवतारोयम्। अस्य इदृशी कान्तिः क्वः आसीत्, अभिनवा भङ्गिश्च। लोकोत्तरं धैर्यं, महान् प्रभावश्च अस्य लोकोत्तरत्वं वर्णयतः। नूनमियं विधातुः नवीना सृष्टिः।

अत्र वामनः आलम्बनम्, कान्तिः उद्दीपनम्, तस्य स्तुतिः अनुभावः, मति-धृति-हर्षादयः व्यभिचारिणः। विस्मयः स्थायिभावः। तेभ्यः सहृदयानां हृदये अद्भुतरसस्य व्यक्तिः भवति।

रसानां स्थायिभावाः लोकात् संस्कारवशात् पूर्वमेव सहृदयहृदये तिष्ठन्ति। स्थायिभावं लक्षयता नाट्यशास्त्रे भरतो वदति। यथा-

**विरुद्धाविरुद्धा वा यं तिरोधातुमक्षमाः।**
**आनन्दाङ्कुरकन्दोऽसौ भावः स्थायीति संज्ञितः॥**

नवस्थायिभावाः यथा-

**रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयन्तथा।**
**जुगुप्सा विस्मयश्चेति स्थायिभावाः प्रकीर्त्तिताः॥ ३०॥**

अर्थात् विरुद्धभावाः अथवा अविरुद्धभावाः यं भावं तिरोहितुमक्षमाः तथा च यः रसानन्दस्य अङ्कुरकन्दः सः स्थायी।।



Scanned with CamScanner

| कारणम्/मनोवृत्तिः | स्थायिभावः | रसः |
|---|---|---|
| नायकनायिकयोरासक्तिः | रतिः | शृङ्गारः |
| विकृतवेशवचनजन्मा चितविकाशः | हासः | हास्यः |
| इष्टनाशादिजन्मा मनोवेदना | शोकः | करुणः |
| प्रतिकुलविषये चित्तस्य तीक्ष्णावस्था | क्रोधः | रौद्रः |
| युद्धविषये आग्रहातिशयः | उत्साहः | वीरः |
| रौद्रशक्तिदर्शनजन्या चित्तविकृतिः | भयः | भयानकः |
| दूषितपदार्थविलोकनजनितमनोभावः | जुगुप्सा | बीभत्सः |
| वस्तुमाहात्म्यं विलोक्य चित्तस्य अवस्था | विस्मयः | अद्भुतः |
| नित्यानित्यवस्तुविचारजन्मा विषयविरागः | निर्वेदः | शान्तः |

## व्यभिचारिभावः

त्रयोत्रिंशत् व्यभिचारिभावाः सर्वे भरतमम्मटजगन्नाथादयः स्वीकुर्वन्ति। एते मनसि स्वल्पकालाभ्यन्तरे जायन्ते लीयन्ते च। चिरं न तिष्ठन्ति अतः व्यभिचारीति संज्ञा। अपरं चास्य नाम सञ्चारिभावः। ते यथा-

**निर्वेदग्लानिशङ्काख्यास्तथाऽसूयामदश्रमाः।**
**आलस्यं चैव दैन्यं च चिन्ता मोहः स्मृतिर्धृतिः॥**
**व्रीडा चपलता हर्ष आवेगो जडता तथा।**
**गर्वो विषाद औत्सुक्यं निद्राऽपस्मार एव च॥**
**सुप्तं प्रवोधोऽमर्षश्चाप्यवहित्थमथोग्रता।**
**मतिर्व्याधिस्तथोन्मादस्तथा मरणमेव च॥**
**त्रासश्चैव वितर्कश्च विज्ञेया व्यभिचारिणः।**
**त्रयस्त्रिंशदमी भावाः समाख्यातास्तु नामतः॥**





एतेषां सामान्यस्वरूपमत्र प्रदीयते यथा-

१. निर्वेदः- तत्त्वज्ञानात्, विपत्तिकारणात्, ईर्ष्याकारणाद्वा आत्मनः अवमाननम्। २. ग्लानिः- कार्ये अनुत्साहः, ३. शङ्का- अनर्थचिन्ता, ४. असूया- असहिष्णुता, ५. मदः- मद्यपानदिजन्या अङ्गग्लानिः, ६. श्रमः- क्लान्तिः, ७. आलस्यम् - कार्ये अनादरः, ८. दैन्यम्- वलहीनता, ९. चिन्ता- ध्यानम्, १०. मोहः- ज्ञानशून्यता, ११. स्मृतिः- पूर्वानुभूतपदार्थस्य ज्ञानम्, १२. धृतिः- धैर्यम्, १३. व्रीडाः - लज्जा, १४. चपलता - अनवस्थितिः, १५. हर्षः - इष्टप्राप्तिजन्यः आनन्दः, १६. आवेगः - संभ्रमः, १७. जडता - वुद्धेः मान्द्यता, १८. गर्वः- निद्राध्यानादिहेतोः अवज्ञा, १९. विषादः- प्रारब्धकार्ये उत्साहहीनता, २०. औत्सुक्यम्- उत्कण्ठा, कालक्षेपासहिष्णुता, २१. निद्रा- इन्द्रियाणां विश्रामः, २२. अपस्मारः- अत्यन्तमनोवेदनाजः रोगविशेषः, २३. सुप्तः - स्वप्नः, २४. प्रवोधः- निद्रानन्तरं विषयज्ञानम्, २५. अमर्षः - स्थिरक्रोधः, २६. अवहित्था- लज्जादिवशात् स्वमनोभावस्य गोपनम्, २७. उग्रता- चण्डस्वभावः, २८. मतिः- शास्त्रादिज्ञानात् पदार्थानां सम्यग्वोधः। २९. व्याधिः- मनोव्यथा, ३०. उन्मादः- चित्तस्य अस्थिरता, ३१. मरणम्- जीवस्य मृत्युपूर्वावस्था (मरणे आलम्बनाभावात् मरणस्य आसन्नावस्था इति उक्तम्) ३२. त्रासः- मनसः क्षोभः, २३. वितर्कः सन्देहकाले भ्रूलतादोलनपूर्वकः विचारः।

## शान्तरसः

शान्तरसस्य स्थायिभावः निर्वेदः। निर्वेदः अर्थात् नित्यवस्तु अनित्यवस्तु च विचारं कृत्वा नित्ये ब्रह्मणि लीनात्मकचिन्ता। किन्तु गृहकलह-इष्टप्राप्तेः विलम्बादिकारणात् जातः क्षणकालिको निर्वेदः न शान्तरसस्य स्थायिभावः शान्तरसस्य उदाहरणं यथा-



Scanned with CamScanner

**अहौ वा हारे वा कुसुमशयने वा दृषदि वा**
**मणौ वा लोष्टे वा बलवति रिपौ वा सुहृदि वा।**
**तृणे वा स्त्रैणे वा मम समदृशो यान्ति दिवसाः**
**क्वचित्पुण्यारण्ये शिव शिव शिवेति प्रलपतः॥ ४४॥**

उत्पलराजस्य पद्यमिदं भतृहरेः वैराग्यशतके प्राप्यते। संसार प्रति वीतरागी कश्चित् स्ववैराग्यं वक्ति। यथा- पुष्पमालायां सर्पे च मम समानबुद्धिः। मम कोऽपि शत्रुः अथवा मित्रं नास्ति। सर्वे मत्कृते समानाः। मम दिवसाः सर्वदा सर्वत्र समानभावेन यान्ति। केवलं पुण्यारण्ये सत्यशिवसुन्दरस्वरूपस्य नामजपेन कालो याति।

अत्र मिथ्याजगत् आलम्बनविभावः, तपोवनाद्युदीपनम्, सर्पहारादिषु समबुद्धिः, अनुभावः, धृति-मति-हर्षादयः व्यभिचारिणः, निर्वेदश्च स्थायिभावः। एभ्यः निष्पन्नः शान्तरसः सहृदयानामास्वाद्यविषयो भवति।

निर्वेदः स्थायी भावः व्यभिचारिभावश्च। अतः व्यभिचारिभावानां गणनाकाले आदौ अमङ्गलप्रायस्यापि निर्वेदस्य ग्रहणमिति टीकाकाराः।

## भावध्वनिः

यथा रसः सहृदयानां मनोविनोदकः तथा भावोऽपि मनोविनोदकः सन् व्यञ्जनया आस्वाद्यमानतां प्राप्नोति। रसवदयमपि असंलक्ष्यक्रमव्यङ्ग्य-ध्वनौ अन्तर्भवति। भावध्वनेः लक्षणम् यथा-

**रतिर्देवादिविषया व्यभिचारी तथाञ्जितः।**
**भावः प्रोक्तः—**

अर्थात् देवता-मुनि-गुरु-नृप-पुत्रविषयिणी रतिः व्यभिचारिणः व्यक्तिश्च भावध्वनिः। देवतां प्रति भक्तस्य आसक्तिः, मुनिगुरुराजादीन् प्रति भक्तिः, पुत्रं प्रतिस्नेहात्मिका आसक्तिरेव भावध्वनिः कथ्यते। तेन





भक्ति-वात्सल्य-मैत्री-आवन्धगतरतिः भावध्वनेर्विषयो भवति। नायकनायिकयोः शृङ्गारतिमका आसक्तिर्न। सा शृङ्गाररसे अन्तर्भवति। भक्ति-वात्सल्ययोः भावेषु अन्तर्भावात् स्वतन्त्रतया तयोः रसत्वं नोक्तम्।

| **पञ्चधा रतिः** | **उदाहरणम्** |
|---|---|
| १. स्नेहात्मिका - | १. नायकनायिकयोः शृङ्गारः |
| २. भक्तिगता - | २. उत्तमेषु श्रद्धा |
| ३. वात्सल्यगता - | ३. कनिष्ठेषु ज्येष्ठानां श्रद्धा |
| ४. मैत्रीगता - | ४. मित्रे मित्रस्य आसक्तिः |
| ५. आबन्धगता - | ५. अचेतने सचेतनस्य श्रद्धा। |

रतिर्देवादिविषयेत्यादि सूत्रे रतिपदेन सर्वे स्थायिभावाः स्वीकरणीयाः। उत्पाद्यरसावस्थाः सर्वे रतिहासादयः स्थायिभावाः, तथा च विभावादिभिः व्यञ्जितः व्यभिचारिभावः भावध्वनिः स्यात्।

**देवविषयिणी रतिः**

काश्मीरकविश्रीमदुत्पलाचार्यप्रणीतपरमेश्वरस्तोत्रावलौ त्रयोदशे स्तोत्रे पद्यमिदम्-

**कण्ठकोणविनिविष्टमीश ते कालकूटमपि मे महामृतम्।**
**अप्युपात्तममृतं भवद्वपुर्भेदवृत्ति यदि मे न रोचते॥ ४५॥**

अत्र परमेश्वरे भक्तस्य सर्वस्वसमर्पणं ध्वन्यते। यथा- शिवकण्ठस्थकालकूटविषं प्राणहारकमपि तच्छरीरसंलग्नसौभाग्यात् भक्तस्य कृते अमृततुल्यं भवति। किञ्च उपात्तं - मूर्ध्ना धृतमपि अमृतं शिवशरीरसंस्पर्श सौभाग्याभावात् कालकूटादपि तुच्छमतः भक्ताय न रोचते।

अत्र श्लोके महादेव आलम्बनविभावः, ईशपदप्रतिपाद्याव्याहतैश्वर्यम् उद्दीपनविभावः। शिवस्तुतिः अनुभावः। धृति-माहात्म्यस्मरणादयः व्यभिचारिणः। **एतैः अनुमितः स्तावकस्य रतिः सामाजिकानां हृदये व्यज्यते।**



Scanned with CamScanner

कथमस्य रसत्वं नोक्तम् इति जिज्ञासां दूरीकृत्य उद्योतकारो वदति- मुनेः स्वतन्त्रेच्छात्वात्। फलबलकल्प्यसामग्रीवैलक्षण्येन सहृदयसंवादेन चोत्कटानन्दांशस्य अप्रकाशात् चेति।

**मुनिविषया रति।**

शिशुपालवधे श्रीकृष्णस्य नारदं प्रति उक्तिः यथा-

**हरत्यघं संप्रति हेतुरेष्यतः शुभस्य पूर्वाचरितैः कृतं शुभैः।**
**शरीरभाजां भवदीयदर्शनं व्यनक्ति कालत्रितयेऽपि योग्यताम्॥**

अत्र नारदः आलम्बनविभावः, दर्शनयोग्यताव्यञ्जनमुद्दीपनम्। श्रीकृष्णस्येयमुक्तिरनुभावः। तद्व्यङ्ग्यः व्यभिचारिभावः सामाजिके मुनिविषयश्रीकृष्णरतिज्ञानं, तेन च रतिभावस्य निष्पत्तिः।

अनेनैव क्रमेण गुरुनृपपुत्रादिरतिश्च ध्वन्यते।

द्वितीयप्रकारकः भावध्वनिः-यत्र व्यभिचारिभावः विभावादिभिः व्यञ्जितः भवति। यथा-

**जाने कोपपराङ्मुखी प्रियतमा स्वप्नेऽद्य दृष्टा मया**
**मा मा संस्पृश पाणिनेति रुदती गन्तुं प्रवृत्ता पुरः।**
**नो यावत्परिरभ्य चाटुशतकैराश्वासयामि प्रियां**
**भ्रातस्तावदहं शठेन विधिना निद्रादरिद्रीकृतः॥ ४७॥**

अत्र विधिरालम्बनम्, निद्राभङ्गः उद्दीपनम्। शठत्वोक्तिः अनुभावः। तेभ्यः व्यञ्जितः असूयाख्य व्यभिचारी भावध्वनिः सहृदयसंवेद्यो भवति। अत्र नायिका आलम्बनम्, कोपश्च उद्दीपनम्, स्वप्नादिदृष्टिः अनुभावः। अतः विप्रलम्भस्य प्रकाशनात् रसः स्यात् इति न चिन्तनीयम्। यतः शठपदगम्या असूया प्राधान्येन व्यज्यते न तु रतिः।

यथा पानकरसे अधिकमरीच्यादीनां योगात् प्राधान्येन मरीचेः गुणः अनुभूयते तथाऽत्र शठत्वोक्तिद्वारा प्राधान्येन नायकस्य विधिं प्रति असूया





सहृदयसंवेद्या भवति न तु रतिः। किन्तु शेषे पार्यन्तिकत्वेन विप्रलम्भात्मिका रतिः प्रकाश्यते।

## रसाभासः भावाभासश्च

लक्षणं यथा- **'तदाभासा अनौचित्यप्रवर्त्तिता'।**

सूत्रस्थतत्पदेन- रसः भावश्च वोध्यौ। यत्र शास्त्रलोकातिक्रमात्मकम् अनौचित्यं प्रतीयते तत्र विभावादिभ्यः व्यञ्जितेषु अपि रसभावेषु रसो भावो वा न स्यात्, अपि तु रसाभासो भावाभासो वा स्यात्। अनौचित्यस्य स्थलं यथा- वहुनायकासक्तिः, गुरुराजदेवतास्त्रीषु आसक्तिः तिर्यग्योनिरतिवर्णनम् इत्यादि। काव्यनाटकेषु वर्णिताः याः घटनाः सामाजिकानां मनसि अरुचिं जनयन्ति तत्र रसाभासो भावाभासो वा स्यात्।

अनौचित्यविषये टीकाकारणां मतानि यथा-

उद्योतकारः—अनौचित्यं च सहृदयव्यवहारतो ज्ञेयम्। यत्र तेषामनुचितमिति धीः। यथा-

**उपनायकसंस्थायां मुनिगुरुपत्नीगतायां च।**
**वहुनायकविषयायां रतौ तथानुभयनिष्ठायां रतौ॥**

सुधासागरकारः- अनौचित्येन प्रकर्षविरोधिना रूपेणेत्यर्थः।।

प्रदीपकारः- तच्चैकाश्रयत्वे तिर्यगादिविषयातायां वहुविषयत्वे व्यभिचारिणाम् आभासाङ्गतायां वा द्रष्टव्यम्।

सरस्वतीकण्ठाभरणकारः-

**हीनपात्रेषु तिर्यक्षु नायकप्रतियोगिषु।**
**गौणेषु च पदार्थेषु तदाभासं विजानते॥**

यथा अनौचित्यप्रवर्त्तिता रतिः रसाभास-भावाभासयोः कारणं भवति तथा हि गुरुप्रभृतिषु हासस्य। वीतरागाद्याश्रयतया करुणस्य। पित्राद्यालम्बनतया रौद्रवीरयोः। वीरगतत्वेन भयानकस्य। यज्ञीयपशुवसाद्यालम्बनतया वीभत्सस्य।



Scanned with CamScanner

ऐन्द्रजालिकाद्यालम्बनतया अद्भुतस्य। चाण्डालादिगतत्वेन शान्तस्य च आभासः स्यात्।

रसाभासभावाभासयोः मुख्यकारणं भवति सामाजिकानां लोकशास्त्रविरुद्धत्वात् अरुचिः। अतः कदाचित् तिर्यगादिवर्णनायां यथा ग्रीवाभङ्गाभिराम...इत्यादिशाकुन्तलपद्ये, मित्रे क्वापि गते...इत्यादि पद्ये च तिर्यग्विषयवर्णनायामपि न सामाजिकानामरुचिः। तत्र च भयानकविप्रलम्भयोः रसत्वं स्वीकृतम्। किञ्च अनेकनायकालम्बनस्य लोकविरुद्धेऽपि द्रौपद्याः पञ्चपाण्डवेषु रतिः न अरुचिकरा अपि तु शृङ्गाराख्यव्यञ्जनक्षमेति वोध्यम्। अतएव यद्यपि काव्यनाट्यश्रवणदर्शनाभ्यां विभावादिसाधारणज्ञाने सति सामाजिकानां स्वीयस्थायिव्यक्तिः इति अलौकिकरसः स्वतः भाति तथापि असाधारण्यप्रतीतिप्रयोजककाव्यवर्णिते यत्र अनौचित्यप्रतीतिसन्धानं तत्र व्यङ्ग्ये रसेऽपि रसाभासव्यवहारः इति ध्येयम् इति भट्टवामनकृतो टीकायां स्पष्टीकृतम्।

रसाभासस्य उदाहरणम्- वारवनितां प्रति कस्यापि चाटुक्तिः-

**स्तुमः कं वामाक्षि! क्षणमपि विना यं न रमसे**
**विलेभे कः प्राणान् रणमखमुखे यं मृगयसे।**
**सुलग्ने को जातः शशिमुखि! यमालिङ्गसि बलात्**
**तपःश्रीः कस्यैषा मदननगरि! ध्यायसि तु यम्॥** ४८॥

अत्र अनेककामुकानां प्रति नायिकायाः अनुरागः तथा च स्तुमः इत्याद्यनुगतं वहुव्यापारोपादानं व्यनक्ति। वहुव्यापारं नाम नायिकायाः रमण-अन्वेषण-आलिङ्गन-ध्यानादीनि अत्र प्रकाशितानि। तेन च वहुनायकाभिलाषः व्यज्यते। भारतीयशास्त्रेषु समाजे च इदं निन्दितं कर्म। अतः रसाभासः।





भावाभासस्य उदाहरणं यथा-

**राकासुधाकरमुखी तरलायताक्षी**
**सा स्मेरयौवनतरङ्गितविभ्रमाङ्गी।**
**तत्किं करोमि विदधे कथमत्र मैत्री**
**तत्स्वीकृतिव्यतिकरे क इवाभ्युपायः॥** ४९॥

अत्र रावणस्य सीतायाः अङ्गसोष्ठववर्णनं न समीचीनम्। सीताप्राप्तिरूपः अभिलाषश्च ततः व्यज्यते। किन्तु देवपत्नीं प्रति रतिः अनौचित्यात् लोकशास्त्र निन्दिततत्वात् च भावाभासः न तु भावध्वनिः।

**भावशान्तिः, भावोदयः, भावसन्धिः, भावशबलता।**

असंलक्ष्यध्वनिषु भावशान्ति-भावोदय-भावसन्धि-भावशबलताख्याः चत्वारः ध्वनयः अपि सम्भवन्ति। तत्र कस्यापि व्यभिचारिभावस्य उपशमे भावशान्तिः, उदये भावोदयः, समकालं यदि द्वयोः व्यभिचारिणोः उदयः स्यात् भावसन्धिः, पूर्वं पूर्वं गुणीकृत्य उत्तरोत्तरं भावानां शबलत्वं यत्र वर्णितं तत्र भावशबलत्वं च।

**भावशान्तिः**- यत्र कस्याप्येकस्य व्यभिचारिभावस्य प्रशमो वर्णितो भवति तत्र भावशान्तिरिति ध्वनिकाव्यं स्यात्। यदिवा एकस्य भावस्य शान्तेः अपरस्य उदयः भवति, स च चमत्कारित्वादास्वाद्ययोग्यो भवति, तथापि अनुभावाद्यनुक्तत्वात् भावशवलतायाः आशयः। यथा- अमरुशतके खण्डितानायिकायाः कोपरूपव्यभिचारिभावस्य शान्तिं कोऽपि धृष्टो नायकः स्ववयस्यसमीपे वर्णयति-

**तस्याः सान्द्रविलेपनस्तनतटप्रश्लेषमुद्राङ्कितं**
**किं वक्षश्चरणाऽऽनतिव्यतिकरव्याजेन गोपाय्यते।**
**इत्युक्ते क्व तदित्युदीर्य सहसा तत्संप्रमार्ष्टुं मया**
**साऽऽश्लिष्टा रभसेन तत्सुखवशात्तन्व्या च तद्विस्मृतम्॥** ५०॥



Scanned with CamScanner

अत्र कोपरूपभावस्य शान्तिरेव चमत्कारविषयः। ततः प्रसादस्योदयेऽपि अनुभावाद्यनुल्लेखात् न भावशबलता, केवला भावशान्तिः।

**भावोदयः**- भावोदयः कस्यचित् व्यभिचारिभावस्य उदये सम्भवति। उदयो नाम उत्पत्तिः। यथा अमरुशतके सपत्नीनामग्रहणं श्रुत्वा काचिन्मुग्धा नायिका कोपपरवशा सती वारम्बारं स्वपत्युः चाटुनि न शृणोति। ततः कियत्कालं तूष्णीं स्थितं नायकम् उद्ग्रीवा सा वारम्बारं पश्यति-

**एकस्मिन् शयने विपक्षरमणीनामग्रहे मुग्धया**
**सद्यो मानपरिग्रहग्लपितया चाटूनि कुर्वन्नपि।**
**आवेगादवधीरितः प्रियतमस्तूष्णीं स्थितस्तत्क्षणं**
**मा भूत्सुप्त इवेत्यमन्दवलितग्रीवं पुनर्वीक्षितः॥ ५१॥**

अत्र सुरतविषयौत्सुक्याख्यव्यभिचारिभावस्य उदयः चमत्कारस्य विषयः सत्यपि कोपप्रशमे तदनुभावानुपादानात् न भावशान्तिः।

**भावसन्धिः**- यत्र द्वयोः विरुद्धयोरविरुद्धयोर्वा व्यभिचारिभावयोः समकालमेव आस्वादो भवति तत्र भावसन्धिः स्यात्। यथा- महावीरचरिते द्वितीयाङ्के सीतामालिङ्गतः श्रीरामस्य परशुरामागमने उक्तिः-

**उत्सिक्तस्य तपःपराक्रमनिधेरभ्यागमादेकतः**
**सत्सङ्गप्रियता च वीररभसोत्फालश्च मां कर्षतः।**
**वैदेहीपरिरम्भ एष च मुहुश्चैतन्यमामीलय-**
**न्नानन्दी हरिचन्दनेन्दुशिशिरः स्निग्धो रुणद्ध्यन्यतः॥ ५२॥**

अत्र पुर्वार्द्धे परशुरामं दृष्ट्वा मुनिदर्शनात्मत्वरारूपः आवेगः, उत्तरार्द्धे च जानक्यालिङ्गनजः हर्षश्चोभौ आस्वादयोग्यौ। अतः आवेगहर्षयोः सन्धिः।

**भावशबलता**- यत्र पूर्वपूर्वभावोपमर्दनेन उत्तरोत्तरभावानां शबलत्वं वर्ण्यते तत्र भावशबलता। उक्तं च झलकीकरटीकायां शबलता नाम- पूर्व





पूर्वोपमर्देन परपरोदयः। प्रदीपकारोऽपि तथा वदति- शवलता तु कालभेदेन निरन्तरया पूर्वपूर्वोपमर्दिनाम्।। अतएव पूर्वपूर्वोपमर्देन उत्तरोत्तरभावानामास्वाद एव भावशबलता। यथा- विक्रमोर्वशीये चतुर्थेऽङ्के उर्वशीं दृष्ट्वा पुरुरवस उक्तिः-

**क्वाकार्यं शशलक्ष्मणः क्व च कुलं, भूयोऽपि दृश्येत सा**
**दोषाणां प्रशमाय नः श्रुतमहो, कोपेऽपि कान्तं मुखम्।**
**किं वक्ष्यन्त्यपकल्मषाः कृतधियः, स्वप्नेऽपि सा दुर्लभा**
**चेतः स्वास्थ्यमुपैहि, कः खलु युवा धन्योऽधरं धास्यति॥ ५३॥**

अत्र-वितर्क—औत्सुक्य-मति-स्मरण-शङ्का-दैन्य-धृति-चिन्ताख्याः व्यभिचारिभावाः क्रमशः व्यञ्जिताः। ते च पूर्वं विमर्द्य शबलत्वं भजन्ते। तदेव आस्वादयोग्यत्वात् अत्र भावशबलताख्यः ध्वनिः।

**भावस्थितिः**- भावस्थितिरपि एका अवस्था सा च भावध्वनिप्रसङ्गे व्यभिचारी तथाऽञ्जितः इतिसूत्रे कथिता। भावप्रशमाद्यवस्थाचतुष्करहितो भावः भावस्थितिः। उदाहरणं- जानेकोपपराङ्मुखेत्यादिः।

### भावशान्त्यादीनामङ्गीत्वम्

विभावादिसमूहालम्बनात्मको रसः सर्वदा प्रधानः एव। किन्तु कदाचित् व्यभिचारिभावाः अपि रसोत्पत्तेः प्राक् स्वानुभावादिभिः पुष्टाः सन्तः आस्वादयोग्याः भवन्ति। तदा रसस्य अङ्गतया "राजानुगतविवाहप्रवृत्तभृत्य वत्" प्राधान्यं भजन्ते। यथा लोके कस्यचित् प्रियभृत्यस्य विवाहयात्रायां अग्रे भृत्यः वरवेशेन याति। ततः राजादयः सर्वे तमनुगच्छन्ति। तदा भृत्योऽपि राजावत् प्रतिभाति। तथा अत्र भावानां प्राधान्यम्।



Scanned with CamScanner

# पञ्चमोल्लासे
# गुणीभूतव्यङ्ग्य-व्यञ्जनाविरोधविमर्श

## गुणीभूतव्यङ्ग्यस्य ८ भेदाः

**वाच्यव्यङ्ग्योः समप्राधान्यम्** (५) — वाच्यः / व्यङ्ग्यः
- अपरस्याङ्गम्
- वाच्यसिद्ध्यङ्गम्
- सन्दिग्धप्राधान्यम्
- तुल्यप्राधान्यम्
- काक्वाक्षिप्तम्

**वाच्यात् व्यङ्ग्यस्य न्यूनप्राधान्यम्** (३) — वाच्यः / व्यङ्ग्यः
- अगूढम्
- असुन्दरम्
- अस्फुटम्

## अपरस्याङ्गे रसवदाद्यलङ्काराः

अङ्गी → भावध्वनिः

अङ्गभूताः:

| | | |
|---|---|---|
| रसः | – रसवत् अलङ्कारः | वामनादिभिः स्वीकृताः |
| भावः | – प्रेयः अलङ्कारः | |
| रस/भावाभासः | – उर्जस्वी अलङ्कारः | |
| भावशान्तिः | – समाहितः अलङ्कारः | |
| भावोदयः | – भावोदयालङ्कारः | मम्मटेन कल्पिताः |
| भावसन्धिः | – भावसन्धिरलङ्कारः | |
| भावशबलता | – भावशबलतालङ्कारः | |



Scanned with CamScanner

## गुणीभूतव्यङ्ग्यस्य भेदाः

प्रथमोल्लासे काव्यभेदनिरूपणावसरे गुणीभूतव्यङ्ग्यस्य सामान्यचर्चा कृताऽस्ति। तत्र वाच्यव्यङ्ग्ययोः समप्राधान्ये व्यङ्ग्यस्य वा ईषन्न्यूनप्राधान्ये गुणीभूतव्यङ्ग्यात्मकं काव्यं स्यात्तच्च द्वितीयश्रेणीयं मध्यमं काव्यं स्यात्। उक्तं यथा-

**अतादृशि गुणीभूतव्यङ्ग्यं व्यङ्ग्ये तु मध्ययम्।**

तस्यैव गुणीभूतव्यङ्ग्यस्य अष्टौ भेदाः अत्र पञ्चमोल्लासे विचारिताः। यथा- अगूढ-अपरस्याङ्ग-वाच्यसिद्ध्यङ्ग-अस्फुट-सन्दिग्ध-तुल्यप्राधान्य-काक्वाक्षिप्त-असुन्दराणि। इदं गुणीभूतव्यङ्ग्यं तत्र भवति यत्र अगूढतया व्यङ्ग्यस्योपस्थितिः सहृदयैः लक्षीक्रियते। वाग्देवतावतारः मम्मटः अत्र स्पष्टतया वोधयितुं **कामिनीकुचकलशवत्** गूढं चमत्करोति अगूढं तु स्फुटतया वाच्यायमानमिति लौकिकोदाहरणं प्रस्तौति। अर्थात् यथा कामिन्याः कुचद्वन्दं वस्त्राच्छादितं सत् चमत्कारकारि भवति न तथा आनन्ददायि अनावृतं सदिति। प्रसङ्गेऽस्मिन् विभिन्नदेशीयनारीणां स्तनसौन्दर्यं वर्णयन्तः समालोचकाः वदन्ति-

नान्ध्रीपयोधर इवातितरां प्रकाशो
नो गुर्जरीस्तन इवातितरां निगूढः।
अर्थो गिरामपिहितः पिहितश्च कश्चित्
सौभाग्यमेति मरहट्टवधूकुचाभः॥

आधुनिकसमाजेऽपि अस्य वर्णनं स्यात्। यथा-

सुशोभते तत् स्तनमेव गात्रे
स्वल्पावृतं चेद् भवति प्रियायाः।
अनावृतं किन्तु न शोभते तत्
व्यङ्ग्योऽपि तद्वन्नगुणीकृतश्चेत्॥





अतएव व्यङ्ग्यवस्तु अतिगूढम् अथवा अगूढं सत् कदापि चमत्कारदायि न भवति। किन्तु वाच्यार्थाच्छादितं सुखेन सहृदयवुद्धिगम्यं सत् चमत्कारकारि भवति।

**१. अगूढस्योदाहरणम्-** असहृदयैरपि झटिति संवेद्यं व्यङ्ग्यवस्तु यत्र तत्र अगूढाख्यं गुणीभूतव्यङ्ग्यम्। यथा- कीचककृतपराभवं निवेदयन्तीं द्रौपदीं प्रति वृहन्नलाख्यस्य अर्जुनस्य उक्तिः-

यस्यासुहृत्कृततिरस्कृतिरेत्य तप्त-
सूचीव्यधव्यतिकरेण युनक्ति कर्णौ।
काञ्चीगुणग्रथनभाजनमेष सोऽस्मि
जीवन्न सम्प्रति भवामि किमावहामि॥ ११३

अर्थान्तरसङ्क्रमितवाच्यस्य अगूढता अत्र प्रकाशिता। अत्र जीवन् अपि न भवामि इति वाक्यांशे जीवन् पदस्य सङ्क्रमणं भवति श्लाघ्यजीवनार्थे। मरणमेव श्रेयः इति व्यङ्ग्यार्थः वाच्यायमानः सत् प्रकाशितः।

अत्यन्ततिरस्कृतवाच्याख्यागूढस्योदाहरणम्- रतिश्रमलाघवाय प्रबोधसमयेऽपि नायकेन सह सुप्तां नायिकां प्रबोधनाय काचित् सखी वदति-

उन्निद्रकोकनदरेणुपिशङ्गिताङ्गा
गायन्ति मञ्जु मधुपा गृहदीर्घिकासु।
एतच्चकास्ति च रवेर्नवबन्धुजीव-
पुष्पच्छदाभमुदयाचलचुम्बिविम्बम्॥ ११४

अत्र उदयाचलरविबिम्बयोः चुम्बनस्य असम्भवात्। चुम्बनं वक्त्रसंयोग इति मुख्यार्थः। उदयाचले रविबिम्बस्य संयोगमात्रं लक्षणया बोध्यते। प्रभातसमयः समागत इति व्यङ्ग्यार्थः अगूढतया प्रकाशितो भवति।

**२. अपराङ्गव्यङ्ग्यम्-** एक रसः यत्र अपरस्य उपकारको भवति तत्र अपरस्य अङ्गत्वेन सः कल्पितो भवति। अङ्गं नाम उपकारकम्। उदाहरणं



Scanned with CamScanner

यथा महाभारते स्त्रीपर्वणि चतुर्विंशेऽध्याये भूरिश्रवसः छिन्नं हस्तमादाय तस्य पत्न्याः विलापः-

अयं स रशनोत्कर्षी पीनस्तनविमर्दनः।
नाभ्यूरुजघनस्पर्शी नीवीविस्रंसनः करः॥

अत्र करुणस्य अङ्गत्वेन शृङ्गारस्य उपस्थापनं शृङ्गारस्य गुणीभूतत्वं द्योतयति। किन्तु करुणः अङ्गीतया ध्वन्यते।।

२.१. रसवदलङ्कारः- रसस्य अलङ्कारता। भावध्वनेः अङ्गतया रसस्य प्रकाशने रसवत् अलङ्कारो भवति। यथा-

कैलासालयभाललोचनरुचा निर्वर्त्तितालक्तक-
व्यक्तिः पादनखद्युतिर्गिरिभुवः सा वः सदा त्रायताम्।
स्पर्धाबन्धसमृद्धयेव सुदृढं रूढा यया नेत्रयोः
कान्तिः कोकनदानुकारसरसा सद्यः समुत्सार्यते॥

अत्र मानिनीपार्वत्याः मानभञ्जनार्थं कृते प्रणामे महेश्वरे पार्वत्याः रक्तरञ्जितनयने धवले संजाते। तेन पार्वत्याः क्रोधो दूरीभूत इति ज्ञातम्। अत्र कवेः पार्वतीविषयकरतिभावः मुख्यः। तदङ्गतया भवभवान्योः शृङ्गारवर्णनम्। अत्र भावध्वनेः अङ्गतया शृङ्गारस्य वर्णनात् अपरस्याङ्गाख्यं गुणीभूतव्यङ्ग्यम्। रसवदलङ्कारत्वेन चास्य संज्ञा प्राचीनैः प्रदत्ता।

२.२. प्रेयोऽलङ्कारः- यत्र भावध्वनेः अङ्गतया अपरभावध्वने उपन्यासः, तत्रापि अपराङ्गगुणीभूतं स्यात्। यथा-

अत्युच्चाः परितः स्फुरन्ति गिरयः स्फारस्तथाम्भोधय-
स्तानेतानपि बिभ्रती किमपि न क्लान्ताऽसि तुभ्यं नमः।
आश्चर्येण मुहुर्मुहुः स्तुतिमिति प्रस्तौमि यावद् भुव-
स्तावद्बिभ्रदिमां स्मृतस्तव भुजो वाचस्ततो मुद्रिताः॥

अत्र पृथ्वीपतिः इति भूविषयकरतिभावः राजविषयकरतिभावस्य





अङ्गत्वेन वर्णितः। अतः प्राचीनानां प्रेयोऽलङ्कारः, मम्मटमते तु अपराङ्गगुणीभूतम्।

२.३. उर्ज्वसी- अलङ्कारः- यत्र भावध्वनेरङ्गतया रसाभासभावाभासयोः वर्णनं भवेत् तत्र अयमलङ्कारः यथा-

बन्दीकृत्य नृप द्विषां मृगदृशस्ताः पश्यतां प्रेयसां
श्लिष्यन्ति प्रणमन्ति लान्ति परितश्चुम्बन्ति ते सैनिकाः।
अस्माकं सुकृतैर्दृशोर्निपतितोऽस्यौचित्यवारांनिधे
विध्वस्ता विपदोऽखिलास्तदिति तैः प्रत्यर्थिभिः स्तूयसे॥

अत्र राजविषयकस्तुतिः भावध्वनिः मुख्यः। तस्य अङ्गतया अनौचित्यशृङ्गारवर्णनात्मकरसाभासभावाभासयोः वर्णनात् उर्ज्वसी-अलङ्कारः।

२.४ समाहितालङ्कारः- यत्र भावध्वनेरङ्गतया भावशान्तेः वर्णनम्। यथा-

अविरलकरवालकम्पनैर्भ्रुकटीतर्जनगर्जनैर्मुहुः।
ददृशे तव वैरिणां मदः स गतः क्वापि तवेक्षणे क्षणात्॥

अत्र राजविषयकरतिः मुख्यः। तस्य अङ्गतया शत्रूणां मदगर्वाद्युपशम वर्णनात् भावशान्तिः अङ्गत्वं प्राप्नोति। अतः समाहितालङ्कारः।

२.५. भावोदयालङ्कारः- यत्र भावध्वनेरङ्गतया भावोदयस्य वर्णनम्। यथा-

साकं कुरङ्गकदृशा मधुपानलीलां
कर्तुं सुहृद्भिरपि वैरिणि ते प्रवृत्ते।
अन्याभिधायि तव नाम विभो! गृहीतं
केनापि तत्र विषमामकरोदवस्थाम्॥

अत्र राजस्तुतिरूपभावध्वनेः अङ्गतया त्रासस्य उदयः भावोदयालङ्कारतामाप्नोति।



Scanned with CamScanner

२.६. भावसन्धि-अलङ्कारः- भावध्वनेः अङ्गतया भावसन्धेः वर्णनात् भावसन्धि-अलङ्कारः। यथा-

**असोढा तत्कालोल्लसदसहभावस्य तपसः**
**कथानां विश्रम्भेष्वथ च रसिकः शैलदुहितुः।**
**प्रमोदं वो दिश्यात्कपटवटुवेषापनयने**
**त्वराशैथिल्याभ्यां युगपदभियुक्तः स्मरहरः॥**

अत्र भगवच्छिवविषयकरतिभावः मुख्यः। तदङ्गतया आवेग-धैर्ययोः (त्वराशैथिल्यगम्ययोः) मिलनात्मवर्णनात् भावसन्धि-अलङ्कारः।

२.७. भावशबलतालङ्कारः- यत्र भावध्वनेः अङ्गतया भावशबलत्वस्य वर्णनं यथा-

**पश्येत् कश्चिच्चल चपल रे का त्वराऽहं कुमारी**
**हस्तालम्बं वितर ह ह हा व्युत्क्रमः क्वासि यासि।**
**इत्थं पृथ्वीपरिवृढ! भवद्विद्विषोऽरण्यवृत्तेः**
**कन्या कञ्चित्फलकिसलयान्याददानाऽभिधत्ते॥**

अत्र राजविषयकरतिभावः मुख्यः। तस्य अङ्गतया शङ्का-असूया-धैर्य-श्रम-दैन्य-विबोध-उत्कण्ठानां क्रमशः शबलत्ववर्णनात् भावशबलताख्यः अलङ्कारः।

रसवदाद्यलङ्कारेषु यदि वा भावोदय-भावसन्धि-भावशवलतानां चर्च्चा प्राचीनैः न कृता तथाऽपि तत्र अलङ्कारस्य सम्भवात् स्पष्टतया मम्मटेनात्र प्रसङ्गोऽयमुपस्थापितः।

३. **वाच्यसिद्ध्यङ्गम्**- वाच्यस्य अर्थात् वाच्यार्थस्य सिद्धये यत्र व्यङ्ग्यः अङ्गत्वेन उपस्थाप्यते। इदं च एकवक्तृकपदवाच्याङ्ग-अनेकवक्तृकपदवाच्याङ्गभेदेन द्विविधम्।

३.१. तत्र एकवक्तृकपदवाच्यस्योदाहरणं यथा-





**भ्रमिमरतिमलसहृदयतां प्रलयं मूर्च्छां तमः शरीरसादम्।**
**मरणञ्च जलदभुजगजं प्रसह्य कुरुते विषं वियोगिनीनाम्॥**

अत्र जलद इव भुजगः इति वाच्यार्थः जलवाचकविषपदस्य हालाहलविषरूपव्यङ्ग्यवस्तुना सिद्ध्यति अन्यथा असिद्धिः। अत्र एक एव कविः वक्ता।

३.२. अन्यवक्तृकपदवाच्याङ्गसिद्धिः। यथा-

**गच्छाम्यच्युत! दर्शनेन भवतः किं तृप्तिरुत्पद्यते**
**किं त्वेवं विजनस्थयोर्हतजनः संभावयत्यन्यथा।**
**इत्यामन्त्रणभङ्गिसूचितवृथावस्थानखेदालसा-**
**माश्लिष्यन्पुलकोत्कराञ्चिततनुर्गोपीं हरिः पातु वः॥**

अत्र 'इत्यामन्त्रणभङ्गिसूचितवृथावस्थानखेदालसाम्' इति वाच्यं अच्युतादिपदवोध्येन ''त्वं मद्विषये च्यवसे। अतः व्यर्थमेवात्र अवस्थानमित्यादि'' व्यङ्ग्येन सिद्ध्यति। अत्र पूर्वार्धे गोपी वक्त्री, उत्तरार्धे कविः वक्ता।

४. **अस्फुटम्**- यत्र व्यङ्ग्यं सहृदयानामपि महता श्रमेण संवेद्यं भवति। यथा-

**अदृष्टे दर्शनोत्कण्ठा दृष्टे विच्छेदभीरुता।**
**नादृष्टेन न दृष्टेन भवता लभ्यते सुखम्॥**

अत्र अदृष्टो यथा न भवसि, वियोगदुःखं च यथा नोत्पद्यते तथा कुर्या इति व्यङ्ग्यं सहृदयानामपि दुर्बोध्यं भवति।

५. **सन्दिग्धप्राधान्यम्**- वाच्यकृतं व्यङ्ग्यकृतं वा प्राधान्यमिति यत्र सन्देहो जायते तत्र इदं स्यात् यथा- कुमारसम्भवस्य तृतीयसर्गे-

**हरस्तु किञ्चित्परिवृत्तधैर्यश्चन्द्रोदयारम्भ इवाम्बुराशिः।**
**उमामुखे बिम्बफलाधरोष्ठे व्यापारयामास विलोचनानि॥**



Scanned with CamScanner

अत्र अधरं परिचुम्बितुमैच्छत् इति व्यङ्ग्यं, युगपल्लोचनव्यापारणं वाच्यः। तयोश्च वाच्यव्यङ्ग्ययोः कतरं प्राधान्यं चमत्कारप्रयोजकत्वं च निरूपणे सन्देहो जायते। प्रसङ्गेऽस्मिन् उद्योतटीकाकारो वदति-

अत्र विलोचनव्यापारणं धैर्यपरिवृत्तिश्चानुभावौ वाच्यौ। तौ यदि औत्सुक्यादीन् व्यभिचारिणोऽभिव्यज्य स्थायिचर्वणायां पर्यवस्यतस्तदा व्यङ्ग्यस्य प्राधान्यम्। व्यङ्गीभूतेच्छामभिव्यज्य एव औत्सुक्यादेर्व्यञ्जनात्। यदि तु रतिकार्यत्वादाहत्यैव स्थायिचर्वणायां पर्यवस्यतस्तदा वाच्यस्य। न चात्र विनिगमकम्। उभयोरपि प्रधानप्रत्यासन्नत्वाद्भावत्वाच्च। न च तुल्यप्रधानता पृथगविश्रामाभावादिति।

६. **तुल्यप्राधान्यम्**- यत्र वाच्यव्यङ्ग्ययोः समप्राधान्यम् यथा-

ब्राह्मणातिक्रमत्यागो भवतामेव भूतये।
जामदग्न्यस्तथा मित्रमन्यथा दुर्मनायते॥ १३०

अत्र जामदग्न्यः परशुरामः क्षत्रियनाशवत् रक्षसां विनाशं करिष्यति इति व्यङ्ग्यवस्तु यथा प्राधान्यं चमत्कारकं तथा भूत्युपदेशमित्रत्वाभिधानारूपं च सामोपायात्मकं वाच्यं प्राधान्यम्।

७. **काक्वाक्षिप्तम्**- काकुः ध्वनिविकारः। उक्तं च **भिन्नकण्ठध्वनिधीरैः काकुरित्यभिधीयते**। तेन भिन्नकण्ठध्वनिना आक्षिप्तं व्यङ्ग्यं यथा वेणीसंहारे प्रथमाङ्के भीमसेनस्य उक्तिः-

मथ्नामि कौरवशतं समरे न कोपाद्
दुःशासनस्य रुधिरं न पिबाम्युरस्तः।
सञ्चूर्णयामि गदया न सुयोधनोरू
सन्धिं करोतु भवतां नृपतिः पणेन॥ १३१

अत्र न मथ्नामि इत्यस्मात् वाच्यात् कण्ठस्वरवैचित्र्यात् अवश्यं कौरवान् मथ्नामि इति व्यङ्ग्यमाक्षिप्यते। काकुः कदाचित् ध्वनेः कारणं भवति कदा





च गुणीभूतस्य। यत्र काकोः विलम्बेन प्रतीतिः तत्र ध्वनिः, यथा गुरुखेदं खिन्ने...। यत्र झटितिबोधः तत्र गुणीभूतम्।

८. **असुन्दरम्**- यत्र वाच्यात् व्यङ्ग्यं चमत्कारहीनम् यथा-

वानीरकुञ्जोड्डीनशकुनिकोलाहलं शृण्वन्त्याः।
गृहकर्मव्यापृताया बध्वा सीदन्त्यङ्गानि॥

अत्र दत्तसंङ्केतनायकः लतागृहे प्रविष्टः इतिव्यङ्ग्यात् गात्राणि सीदन्ति इति तु अधिकरमणीयम्।

### (व्यञ्जनाविरोधिमतखण्डनम्)

#### अभिधालक्षणाभ्यां व्यङ्ग्यस्य प्रकाशनं न सम्भवः

अभिधाव्यापारः शब्दस्य सङ्केतितार्थमात्रं वोधयति। वाच्यार्थात् वाक्यार्थवोधः यदा न सम्भवति तदा लक्षणा केषुचित् पदेषु अन्यार्थं प्रकाशयन् वाक्यार्थरूपवाच्यार्थस्य पोषको भवति। अतएव लक्षणा तत्र कल्पनीया यत्र वाच्यार्थः वक्तुः उद्देश्यं स्पष्टीकर्तुमक्षमा भवति। अपि च लक्षणास्वीकारार्थं वाचकशब्दस्य स्खलद्गतिरपेक्ष्यते। तत्रापि तत्सम्बन्धितार्थः नूतनवाक्यार्थस्य पोषणाय स्वीक्रियते। किन्तु व्यङ्ग्यार्थवोधकाले वाच्यार्थः स्वतन्त्रतया प्रतीयते। ततश्च विशेषरूपव्यङ्ग्यार्थः प्रकाशितो भवति। तत्र वाचकशब्दः वाच्यार्थश्च व्यङ्ग्यस्य व्यञ्जकतया व्यवहृतौ भवतः। प्रयोजनवती लक्षणा तु व्यङ्ग्यात्मकप्रयोजनं विना न सम्भवः। अभिधामूलव्यञ्जनायामपि अनेकार्थकशब्दानां संयोगादिभिः नियन्त्रणं विधाय विशेषरूपार्थस्य प्रकाशः व्यञ्जनया क्रियते। अतः अभिधालक्षणाव्यापारौ व्यङ्ग्यार्थवोधनाक्षमौ स्तः। अविवक्षितवाच्य-ध्वनिस्थले वस्तुरूपव्यङ्ग्यः प्रकाशितो भवति न अलङ्काररूपो रसादिरूपो वा। अतः ध्वनिकारो वदति व्यङ्ग्यस्य महाविषयत्वात्। अभिधामूलध्वनावपि प्राकरणिकार्थस्य प्रकाशनं कृत्वा अभिधायां विरतायां व्यञ्जनया अन्यार्थस्य परिप्रकाशो भवति। कदाचित्



Scanned with CamScanner

उभयोश्च उपमानोपमेयभावं परिकल्प्य उपमालङ्कारध्वनिः परिकल्प्यते। यथा उल्लास्यकरवालेत्यादिश्लोके राजरूपोऽर्थः अभिधया इन्द्ररूपोऽर्थश्च व्यञ्जनया प्रकाशितौ। ततः उभयोः उपमानोपमेयभावं परिकल्प्य उपमालङ्कारध्वनिः स्वीक्रियते।

## अभिहितान्वयवादिमते व्यञ्जनाचर्चा

अर्थशक्तिमूलध्वनिस्थलेऽपि व्यञ्जनां विना विशेषवाक्यार्थरूपस्य वस्तु-अलङ्कारध्वन्यः बोधोऽसम्भवः। अभिहितान्वयवादिनः आकांक्षा-योग्यता-सन्निधि-वशात् गृहीतानां पदार्थानां समन्वयार्थं स्वतन्त्रां शक्तिं स्वीकुर्वन्ति। तत्रापि तात्पर्याख्यशक्तिः पदार्थानाम् अन्वितार्थरूपं वाक्यार्थं बोधयति। यत्र अभिधा वाक्यार्थवोधनाय अक्षमा सा कथं वा व्यङ्ग्यार्थं बोधयेत्। अतः तेषां मतेऽपि सामान्यवाक्यार्थात् व्यङ्ग्यरूपव्यङ्ग्यार्थस्य बोधो न स्यात्। अतएव तेषां मतेऽपि सामान्यवाक्यार्थात् विशेषवाक्यार्थस्य बोधाय नवीना शक्तिरावश्यकी। सैव व्यञ्जना सर्वालङ्कारिकप्रस्तुता इति। एतदेव मम्टाचार्येण उक्तम्-'यत्र पदार्थोऽपि विशेषरूपो वाक्यार्थस्तत्र अभिहितान्वयवादे का वार्त्ता व्यङ्ग्यस्य अभिधेयतायाम्। अतः कुमारिलभट्टानुयायिनो मतेऽपि व्यञ्जना स्वीकर्त्तव्या।

## अन्विताभिधानवादिनां मते व्यञ्जना

अन्विताभिधानवादिनः प्रभाकरगुरुमतानुयायिनः प्रत्यक्ष-अनुमान-अर्थापत्तिसम्बन्धत्रयेण वाक्यार्थबोधं स्वीकुर्वन्ति। उक्तं च-

**शब्दवृद्धाभिधेयाँश्च प्रत्यक्षेणात्र पश्यति।**
**श्रोतुश्च प्रतिपन्नत्वमनुमानेन चेष्टया॥**





**अन्यथाऽनुपपत्त्या तु बोधेच्छक्तिं द्वयात्मिकाम्।**
**अर्थापत्त्यावबोधेत सम्बन्धं त्रिप्रमाणकम्॥**

शब्दार्थानभिज्ञः वालः लोकव्यवहारात् शब्दानामभिधेयार्थं स्वीकरोति। यथा- 'गामानय', 'गां नय', 'अश्वं नय', 'लवणं देहि', 'अन्नं देहि' इत्यादि वाक्येभ्यः भिन्नभिन्नतयोच्चारितानां पदानाम् अर्था अपि भिन्नाः इति प्रथमतः जानाति। ततः तत्सादृश्यशब्दानां व्यवहारात् तथैवार्थं स्वीकरोति। तदेव उच्यते 'अस्माद् वाक्यात् एवंविधोऽर्थः प्रतिपन्नः' इति तच्चेष्टया तयोरखन्डवाक्यवाक्यार्थयोः अर्थापत्त्या वाच्यवाचकभावलक्षणं सम्बन्धमवधार्य बालस्तत्र व्युत्पद्यते। अत्रायं सारः- लोकव्यवहारात् अखण्डवाक्यार्थवोधः। पुनश्च अर्थापत्त्या विशेषवाक्यार्थवोधः। ततश्च विशिष्टवाक्यार्थवोधः। अतएव अन्वितानां पदानां प्रत्ययः प्रथमतो भवति। ततः अन्वितपदार्थाः एव वाक्यार्थं वोधयन्ति। तस्मात् वाक्यार्थाय नवीनशक्तेरावश्यकता नास्ति।

अत्र विचार्यते। यदा 'आनय' पदस्य प्रयोगः क्रियते तदा तेन सह गौ-अश्व-नट-बालादिपदार्थाः सामान्यतया आक्षिप्यन्ते। ततः विशेषरूपार्थस्य स्वीकारार्थं नवीना शक्तिः आवश्यकी। यदि प्रत्यभिज्ञाद्वारा विशेषार्थः आक्षिप्तो भवेत्, यथा- 'घटमानय' इति वाक्ये जातिरूपघटशब्दात् व्यक्तिरूपः घटः आक्षिप्यते। तथापि व्यङ्ग्यार्थबोधनिमित्तम् अयं मार्गः असमीचीनः। यतः सामान्यार्थात् विशेषार्थस्य बोधः सङ्केतितः। यथा- 'आनय' इत्यस्य अनेकपदान्वितानयनक्रिया सङ्केतबलात् एकत्रैव नियमितो भवति। ततः जातिरूपात् व्यक्तिरानयनार्थमभिधाभिन्नः व्यापारो अपेक्ष्यते। यथा-

'गाम् आनय' - इत्यत्र वाक्यार्थवोधः अनेन क्रमेण स्यात्।

(१) प्रथमसोपाने गो- अश्वाद्यर्थान्विता आनयनक्रिया।

(२) द्वितीयसोपाने सामान्यगोजातिमानयेति बोधः।



Scanned with CamScanner

(३) तृतीयसोपाने निर्दिष्टगोव्यक्तिमानयेतिबोधः।

अनेनैव प्रकारेण वाक्यार्थवोधानन्तरं पुनश्च रमणीयार्थरूपस्य प्रतीयमानार्थस्य बोधः कया शक्त्या सम्भवः? अतः व्यञ्जना एव वाच्यरूपवाक्यार्थात् व्यङ्ग्यार्थं बोधयति इति स्वीकरणीयम्। अन्यथा **निःशेषच्युतचन्दनादिस्थले न गतासि** इति वाच्यार्थात् तत्रैव गतासि इति रमणीयव्यङ्ग्यवस्तु प्रकाशितं न स्यात्।

**सोऽयमिषोरिव दीर्घदीर्घतरोऽभिधाव्यापार** इति न्यायात् व्यङ्ग्यार्थसिद्धिः न स्यात् न वा **यत्परः शब्दः स शब्दार्थः** इति न्यायात्।

भाट्टमीमांसकाः वदन्ति यथा- यदा कश्चन धनुर्धरः शरं निक्षिपति तदा स शरः शत्रोः वर्म छिनत्ति, ततः चर्म छिनत्ति, ततः हृदये च प्रविशति। तथा हि शब्दव्यापारः वाच्यार्थम्, अन्वितार्थं, व्यङ्ग्यार्थं च बोधयति। अर्थात् एक एव शब्दव्यापारः वक्तुः तात्पर्यार्थं विशिष्टार्थं वा बोधयितुं समर्थः। अतः वाच्यार्थाय अभिधाव्यापारः, अन्वितार्थाय तात्पर्यव्यापारः, व्यङ्ग्यार्थाय व्यञ्जनाव्यापारश्च स्वतन्त्रतया न स्वीकर्त्तव्याः।




आचार्यमम्मटः तेषां मतं सूक्ष्मविचारेण खण्डयति। वस्तुतः ते मीमांसकाः **इषोरिव दीर्घदीर्घतरोऽभिधाव्यापार** इत्यस्य प्रकृतं तत्त्वं न विदन्ति। मम्मटः तान् परिवदन् आह- अतात्पर्यज्ञाः ते मूढधियः देवातानां बलिभूताः बुद्धिहीनपशुतुल्याः। 'भूतभव्यसमुच्चारणे भूतं भव्याय उपदिश्यते' इति





यदुक्तं, तस्य आशयो भवति एकः भूतार्थः अपरश्च भव्यार्थः एकत्र वाक्ये स्तः। तत्र भूतार्थेन भव्यार्थः परिप्रकाशितो भवति। अर्थात् विधेयांशः अनुवाद्यांशेन परिप्रकाशितो भवति। सर्वदा भव्यः अथवा विधेयः मुख्यत्वेन कथ्यते। स एव नवीनार्थं परिप्रकाशयति। तदेव उच्यते—कारकपदार्थः सिद्धः भूतो वा। क्रियापदार्थः साध्यः भव्यो वा। क्रियासाधनार्थं कारकपदार्थस्य कथनं भवति। प्रसङ्गेऽस्मिन् मम्मटः अदग्धदहनन्यायस्य उपस्थापनं करोति। यथा- लोके अग्नौ भस्मना सह तृणानां पातनेन अग्निः तृणं दहति न तु दग्धं भस्म। तथा अप्राप्तवस्तु विधेयरूपेण शब्दोपात्तं भवति। अन्ये तु पूर्वप्रकाशितार्थकाः शब्दाः तस्य नवीनवस्तुनः बोधनाय अनूद्यन्ते। यथा- श्येनयागे नवीनवस्तु अप्राप्तवस्तु वा- लोहितोष्णीषाः (विधेयांशः), ऋत्विजः प्रचरन्ति (अनुवाद्यांशः) पूर्वत्र ज्योतिष्टोमयागे कथितः। अत्र अदग्धत्वेन लोहितोष्णीषाः, अतः तस्य मुख्यतया अर्थकथनं भवति। दग्धत्वेन ऋत्विजः प्रचरन्ति। पूर्वत्र ज्योतिष्टोमयागे कथितत्वात् अत्र विचारः न क्रियते।

**नैमित्तिकानुसारेण निमित्तानि कल्प्यन्ते** इति न्यायादपि व्यङ्ग्यार्थः नाभिधेयः। केचिन्मीमांसकैकदेशिनः अभिधाव्यापारेण व्यङ्ग्यार्थस्यापि सिद्धिं परिकल्प्य वदन्ति। यथा- व्यङ्ग्यप्रतीतिकार्याय अभिधेयशब्दानां निमित्तत्वं वर्त्तते। निमित्तं = कारणम्, नैमित्तिकं = कार्यम्। अतएव कवेः यदा व्यङ्ग्यार्थरूपकार्यप्रतीतिं प्रति इच्छा तदा तस्यार्थस्य परिप्रकाशकं शब्दं व्यवहरति। स एव शब्दः तादृशं विशिष्टार्थं परिप्रकाशयति।

मीमांसकैकदेशिनां मतं खण्डयन्नाह मम्मटाचार्यः- निमित्तं तु द्विविधम् कारकं ज्ञापकं च। कारकं नाम जनकत्वगुणविशिष्टम्। ज्ञापकं नाम सिद्धस्य वस्तुनः परिप्रकाशनम्। व्यङ्ग्यार्थस्य परिप्रकाशाय एते निमित्ते न समर्थे। यतः शब्दः अर्थं न जनयति अपि तु प्रकाशयति, अतः न शब्दस्य कारकत्वम्। न वा ज्ञापकत्वं यतः व्यङ्ग्यार्थस्य पूर्वसिद्धिर्न भवति। अतः अज्ञातस्य



Scanned with CamScanner

व्यङ्ग्यार्थस्य ज्ञापक-निमित्तं शब्दो न भवति। शब्दस्तु केवलः अन्वितार्थे संकेतितः न तु विशिष्टार्थे व्यङ्ग्ये। अपि च अस्मादेव शब्दात् अयमेव व्यङ्ग्यार्थः बोध्य इति कश्चन निश्चयो नास्ति, येन शब्दस्य उच्चारणानन्तरं स एव व्यङ्ग्यार्थः संङ्केतितः स्यात्। अतः **नैमित्तिकानुसारेण निमित्तानि** कल्प्यन्त इति न्यायेन व्यङ्ग्यार्थसिद्धिरसम्भवः। वाक्ये सिद्धपदानां साध्यपदानां च समावेशोऽस्ति। तत्र साध्यपदानाम् अर्थः नवीनतया शब्दव्यापारेण वोध्यते। अन्ये च तस्य सहायकाः यथा- ऋत्विक्प्रकरणे श्येनयागविचारे लोहितोष्णीषाः इति पदं नवीनं न तु 'ऋत्विजः प्रचरन्ति' इति पदद्वन्दम्। यतः पूर्वमेव ज्योतिष्टोमयागे सोष्णीषाः विनीतवसनाः ऋत्विजः प्रचरन्ति इत्यस्मिन् वाक्ये तयोः अर्थः प्रोक्तः। अतः अत्र लोहितेत्यादिवाक्ये ते तु साधनभूते। केवलं लोहितोष्णीषाः इति पदं साध्यं विधेयं वा। तथाहि 'दघ्ना जुहोति' इति वाक्ये दघ्ना इति पदं विधेयम्। अत्र शब्दः क्रमशः रक्तवर्ण-उष्णीषधारिरूपार्थपरः, दध्यर्थप्रकाशपरः। स यावन्तं कालं तमर्थं न प्रकाशयति तावन्तं कालं स न विरमते। अतः तथा उक्तं **यत्परः शब्दः स शब्दार्थः** अथवा **सोऽयमिषोरिव दीर्घदीर्घतरोऽभिधाव्यापारः**। अनुवाद्यविधेययोः स्पष्टता यथा-

| वाक्यम् | अनुवाद्यम्/सिद्धम्/भूतम् | विधेयः/साध्यम्/भव्यम् |
|---|---|---|
| १ अश्वः धावति- | १. अश्वः | १. धावति |
| २ लौहितोष्णीषाः ऋत्विजः प्रचरन्ति | २. ऋत्विजः प्रचरन्ति | २. लोहितोष्णीषाः |
| ३. दध्ना जुहोति- | ३. जुहोति | ३. दध्ना |

अत्र शब्दः विधेयपरः। तस्य प्रकाशनं विना तस्य विरामो नास्ति।





एकस्मिन् वाक्ये पदद्वयं पदत्रयं वा विधेयरूपेण स्यात्। यथा- **रक्तं पटं वयः**। अत्र यदि पूर्ववाक्ये 'पटं वय' इति उक्तं स्यात्तर्हि अत्र एकमेव 'रक्तं' विधेयः। यदि पूर्ववाक्ये 'वय' इति उक्तं स्यात्तर्हि अत्र द्वे पदे यथा- रक्तं- पटमिति विधेयभूते। यदि किमपि नोक्तं स्यात्तर्हि त्रीणि पदानि विधेयभूतानि स्युः। अतः वाक्ये उच्चारितशब्दाः सर्वदा नवीनपदानां (विधेयानां) बोधकाः भवन्ति। किन्तु अनुपात्तानां (अनुच्चारितानाम्) बोधकाः न भवन्ति। अन्यथा **पूर्वो धावति** इत्यस्यात् वाक्यात् **अपरो धावति** इत्यर्थोऽपि प्रकाशितः स्यात्। अतएव उच्चारितशब्दानामर्थबोधनाय **यत्परो शब्दः स शब्दार्थः** इति उक्तम्। इषुवत् अभिधाव्यापारोऽपि वक्तुस्तापर्यवोधकः न स्यात्।

### विषं भक्षय मा चास्य गृहे भुङ्क्त्थाः इत्यस्य वाक्यार्थवोधः

विषं प्राणहारकं तथापि तस्य भक्षणं शत्रोः गृहे भक्षणात् वरमिति वाक्यार्थात् लक्षणाव्यापारेण एव अत्र शत्रोः गृहे भक्षणवारणात्मकः अर्थः लक्ष्यते न तु अभिधाव्यापारेण।

अत्र अभिधया भक्षणवारणात्मकार्थस्य बोधः कथं न स्यादिति चेत् उच्यते—अत्र 'विषं भक्षय, अस्य गृहे मा भुङ्क्था' इति वाक्यद्वयं मुख्यक्रियान्वितमस्ति। 'च' इति अव्ययपदम् उभयवाक्यस्य एकवाक्यतां समर्थयति। एकस्य हितकारिणः मित्रस्य वाक्ये विषभक्षणरूपार्थः वक्तुः तात्पर्यं परिपूरयितुं यदा असमर्थस्तदा लक्षणया 'अयं परमक्षतिकारकः जनः, विषात् अपि भयङ्कर इत्यादि प्रयोजनं परिकल्प्य अस्य गृहे न भोक्तव्यम्' इति अर्थं लक्षयति। न तु अभिधया अयं तात्पर्यार्थो बोध्यते। यतः क्रियाद्वयान्वितवाक्ययोः अङ्गाङ्गिभावकल्पनमसम्भवम्। उक्तं च **गुणानां च परार्थत्वादसम्बन्धः समन्तात्**। अथात् गौणपदार्थाः परार्थे सृष्टत्वात्, तेषां



Scanned with CamScanner

परस्परसम्बन्धो न स्यात्। तथाहि मुख्यार्थानां परस्परसम्बन्धश्च सम्भवः येन अस्य गृहे न भोक्तव्यम् इति अर्थः प्रकाशितः स्यात्। अतः शत्रोः गृहे भक्षणवारणार्थस्तु लक्ष्यार्थः न तात्पर्यार्थः।

**'सोयमिषोरिव दीर्घदीर्घतरोव्यापार इति'** यदुक्तं तेनाऽपि व्यङ्ग्यार्थसिद्धिः न स्यात्। आचार्यः मम्मटः अस्य फलितार्थं स्पष्टीकरोति। यथा- यदि शब्दश्रवणानन्तरं यावान् अर्थः लभ्यते सर्वेऽपि अर्थाः अभिधाव्यापारबोध्याः स्युः, तर्हिः 'ब्राह्मण! पुत्रस्ते जातः' इत्यस्मात् वाक्यात् लभ्यः आनन्दानुभवोऽर्थः, 'कन्या ते गर्भिणी' इत्यस्मात् वाक्याच्च शोकरूपोऽर्थः वाच्यभूतौ स्याताम्। किन्तु तथा न भवति। हर्षशोकयोः शब्दोपातत्वाभावात् नाभिधेयत्वम्। अन्यथा लक्ष्यार्थस्यापि वोधनाय अभिधाव्यापारः समर्थः स्यात्। लक्षणास्वीकारस्य आवश्यकता नास्ति। मुकुलभट्टः लक्षणामपि न स्वीकरोति। तस्य मते सर्वे अर्थाः अभिधया वोध्यन्ते।

मीमांसायां यदपि श्रुति-लिङ्ग-वाक्य-प्रकरण-स्थान-समाख्यानां पूर्वं पूर्वं प्रति परवर्त्तिनां न्यूनवलत्वं स्वीकृतम् अन्विताभिधानवादिभिः, तत्रापि दोषः आपतेत्। अर्थात् आदौ श्रुतिप्रमाणेन झटिति अर्थावगमः, ततः विलम्बेन लिङ्गप्रमाणेन, ततोऽपि विलम्बेन वाक्यादिप्रमाणेन इति मीमांसकाः वदन्ति। श्रुतिः = निरपेक्षरवः। लिङ्गम् = शब्दसामर्थ्यम्। वाक्यम् = आकांक्षावशात् पदसमूहोत्थैः मिलितार्थः। प्रकरणम् = आकांक्षा। स्थानम् = समानदेशत्वम्। समाख्या = यौगिकशब्दरूपा। अर्थबोधकाले इमानि प्रमाणानि अपेक्ष्यन्ते। तत्र प्रथमप्रमाणं श्रुतिः सर्वेभ्यो वलवत्तमम्। तस्मात् सहसा अर्थबोधो भवति। तदनन्तरं लिङ्गप्रमाणेन विलम्बेन अर्थबोधः। अतएव कालभेदेन अर्थद्वयलाभो यदा भवति तदा एकेनैव व्यापारेण अर्थद्वयलाभः कथं सम्भवः ? तस्मात्



Scanned with CamScanner

एकैव व्यापारः वाच्यव्यङ्ग्ययोः बोधको न भवति। व्यञ्जना स्वतन्त्रतया स्वीकर्त्तव्या।

Scanned with CamScanner